५१८४

नं. — ५१८४

नाम.ग्र — कात्यायन सूत्र व्याख्या [illegible]

२२शाध्यायः

कर्ता — श्री याज्ञिकदेवः

पत्र. सं. — ६३ सं. — [illegible]

विषयः — सूत्र पद्धति परि. शिष्ट.

कात्यायनसूत्रव्याख्यान द्वाविंशाध्यायः

५१८४

२२

द्वाविंशो
पत्र ६२

१ श्रीगणेशाय नमः दर्शपूर्णमासादीनि पित्र्यमेधांतानि याजुर्वैदिकानि कर्माण्युक्तानि
अधुना सामवेदविहितान्येकाहाहीनसत्राणि वक्तुं प्रतिज्ञां करोति ॥ अथैकाहाः ॥ व्याख्या
स्यंत इति शेषः अथानंतरं एकाहा एकसुत्याः क्रतवः अभिधास्यंते । एकाहस्य अहर्गणहीना
नां सत्राणां चोपलक्षकं तेनैकाहाहीनसत्राण्यभिधास्यंत इत्यर्थः अथशब्दोऽधिकारां
तरप्रज्ञप्त्यर्थः । अथानंतरं सामवेदविहितानि कर्माण्युच्यंत इति ॥ अप्रवचनेऽग्निष्टोमः ।
अप्रवचने संस्थांतरस्यानुक्तौ अग्निष्टोमसंस्थः क्रतुर्भवति । वचनात्तु संस्थांतरं । यथा
कृ॰पा॰७ गोआयुषी उ[illegible]वित्यादि । अत आग्नेय एकः सवनीयः पशुः यमग्न इति प्रचर[illegible]शे पी ७
९८ षहोमस्तदभावेष तु [illegible] होतहोमो वा यज्ञा यज्ञीयं तेनु याजाक्षीति विशेषः तत्र प्रथमे
काह माहा ॥ भर्द्धेनुर्दक्षिणाः । भ[illegible]काहो धेनुर्दक्षिणाः भर्गो मे काहो धेनुर्दक्षिणोऽग्नि
ष्टोमसंस्थो भवति । धेनुर्दक्षिणा यस्मिन्सो धेनुदक्षिणः । अत्र धेनोर्यज्ञदक्षिणात्वेन वि
धानादितराः सर्वा हिरण्यवस्त्राश्वादिका दक्षिणा निवर्त्तंते । तत आश्वदानाभावादश्वानु
तेरभावः । वासः पूर्वबद्धं हिरण्यमवधायेत्यत्र वासोहिरण्ययोर्दक्षिणाभूतयोः चतुर्गृही
तमध्ये निधानं विहितं । अप्रवृत्तयोर्निवर्त्तितत्वादुक्तिमध्येतयोरनिधानं तया धेनो
रेकत्वाद्दक्षिणामित्र णामंत्रे ऊहः कर्त्तव्यः रूपेणा ते गामभ्यागां चुंचुत्य स्तबिध्व देवाविभ
जनु । ऋतस्य यथा प्रेहि चं दूत दक्षिणा इति । अत्र शाखांतरविशेषः सर्वेष्वेकाहेषु सा राम ९

तु२

धारणाउक्तः। नुदगयनपूर्वपक्षपुण्याहसंनिपातेयज्ञकालोनादेशेप्रथमायांपू
र्वपक्षस्यदीक्षेतेहोभ्यः। पूर्वपक्षस्यशुक्लपक्षस्यप्रथमायांतिथौप्रतिपदिएकाहे
भ्योदीक्षेत। ६ ध्यावानक्षत्रयोगंशुक्लपक्षेएवनक्षत्रयोगंदृ [illegible] अनुकूलनक्षत्र पृ॰ २
योगं विलोक्यवादीक्षावर्तव्या॥ नप्रतियज्ञियमः। तेषामेकादीक्षा। नादेशेतिस्र
श्चतस्रोऽपरिमिताबा॥ तिस्रउपसदः। इतिअन्यत्सर्वमग्निष्टोमवत्॥ ज्योतिः। ज्यो
तिर्नामैकाहोग्निष्टोमसंस्थोभवति। पुज्ञतिवदेव॥ गोआयुषीनु। गोश्चअयु कृष्णो ६
श्चगोआयुषीइमौद्वावेकाहावुक्थ्यसंस्थौभवतः अवचनेग्निष्टोमइत्यस्यापवादः। अश्वप्रा
ज्ञत्वेवदक्षिणा एक आग्नेयः सवनीयः पशुः। द्वितीयरौद्रास्तः। नुचे प्रथमंपरिधिमा छ्य
लभतेयमग्नइति। यज्ञायज्ञीयांतेचयज्ञ(छ्य)चवियर्हि। तृतीयसवनेआग्रयणाग्रहणानं
छ्य तरमुक्थ्यस्थाल्यमुक्थ्य(छ्य)ग्रहणांइत्येवमादयउक्थ्यसंस्थोक्ताविशेषाभवंति। मानवे। आ
म्नातंविधानमेकाहानांसाग्नयः सर्वेषड्शिलीवसुद्यानुर्मास्यभ्योयथांचाग्निवा
दीक्षोपसदः कामायेषुप्रजापशवः प्रजापतिर्वाप्रवर्ग्यीस्तइति॥ अभिजिद्विश्वजितौ।
अभिजिद्विश्वजिद्विश्वजित्संज्ञौद्वावेकाहावग्निष्टोमसंस्थौक्रतूभवतः अभिजिन्भ
वत्यनभिजितस्याभिजित्याइतिएतद्विश्वजितोप्युपलक्षणं विश्वजिभवतिविश्वजि
त्याइतिब्राह्मणांतरं। अनयोर्मध्ये। अभिजितोदक्षिणामाह॥ सहस्रमभिजितोदक्षिणा

अभिजित एकाहस्य सहस्रं गवां दक्षिणा भवति। पक्षान्तरमाह। शताश्वं वा। शतमश्वा अ-
धिका यस्मिन्गवां सहस्रे तच्छताश्वं। शताश्वाधिकं गवां सहस्रमभिजितो दक्षिणेत्यर्थः।
अथ विश्वजितो दक्षिणामाह॥ सहस्रं शताश्वं सर्ववेदसं विश्वजितः गवां सहस्रं। सर्ववेद-
सं सर्वस्वं सर्वधनं वा विश्वजितो दक्षिणा भवति। अत्र छन्दोगसूत्रं कामं त्वयमाभ्यां
सा॰ यजेत सहस्रमभिजिति दक्षिणां शताश्वसहस्रं सर्ववेदसं वा विश्वजित इति तत्र सह-
स्रपदे अश्वदानमप्यगृह्णाति स्नानं बध्यास्त्रैधातवी चेत्ये तावता भवति। नाश्वाहुतिः। अ-
शताश्वपदे अश्वाहुतिर्भवति नाश्वदानमिति स्नानं बध्यस्त्रैधातवी च भवत्येव। सह-
स्रदक्षिणाधिकदक्षिणापि विधानात्। सर्ववेदसपक्षे एकं अश्वदानमप्यगृह्णामपि तत्र भव-
ति। सर्ववेदसे गृहीतव्य इति वचनात् हिरण्यादेः प्राप्तत्वात्स्यात्र निवृत्तिं दक्षिणान्तरवि-
धानात्। बह्वृचानां छन्दोगानां चायं विश्वजिदग्निष्टोमः सर्वपृष्ठ[illegible]आम्नायते।
तेनाच सर्वैतिथ्या आप्यभवति। सर्वपृष्ठश्चैव सर्वैतिथ्या इति संज्ञा विश्वजिति वंचना
सर्वपृष्ठ[illegible] काल एव गृह्यन्त इति श्रुतेश्च। सर्वाणि रथसंसाराणि प्रपाकरणानि। तत्र वि-
राज्ञो रथसंसारणाद्दुष्प्रवरणाभिः प्राकरणानि छेवल्यादि पुहोत्र प्रलयाः प्रतिग्रहा-
श्च। इतरे पृष्ठ्ये पृष्ठ्ये पृष्ठ पृष्ठ्य प्रथमस्य मेकैकं सर्वस्वदानेन विहितं सर्वस्वस्य भूत[illegible] राम २
भूमिभूमृद्दरपि दाने प्राप्तेऽर्थमाह॥ ज्येष्ठपुत्रमपभज्य भूमिमूद्रवर्जे या गावि शेषा

स्य २

विश्वजिति सर्ववेदसं दक्षिणां ददातीति श्रुतं। तत्रेदं चिन्त्यते। अस्थायुत्रमपभम्यस्रोपेति
वर्जनेन तद्भागदानेन स्वधनमध्ये भागवर्जितं कृत्वा तस्मै तदीयं भागं दत्त्वेत्यर्थः भूमि
अश्वद्रव्यचदासभूतं वर्जयित्वान्यसर्वस्वं ददातीति कुत एतत् भूमिश्चद्रव्यवर्जमिति तत्र हेतु
सर्वेषां योगविशेषात्। संबंधाविशेषात्। असत्स्वत्वव्यवहारणाशयनासनचंक्रमणा
दिसंबंधः सर्वेषामविशिष्टः तेन सर्वसाधारणत्वान्नस्फुटं स्वत्वं तथा धर्मार्थेप
रिचारकत्वेन यजमानमुपस्थितोयः शूद्रः तस्य स्वत्वाभावादनिच्छया परवश्य
त्वान्भ्युपगमसंभवाच्च न देयं। यो हि अस्यापरिक्रीय दासत्वेन स्थापितो भवति स व
श्यो भवति यस्तु धर्मार्थमव सेवां कुरुते स सर्वेषामविशिष्ट एव। अस्यास्वीकृतस्य
शूद्रस्यापि दानमाह॥ शूद्रदानं वा दर्शनावि[रो]धाम्यां। वाशब्दो व्यवधारणे भृत्यास्वी
कृतस्य शूद्रस्य दानं भवत्येव कुतः दर्शनादविरोधाच्च पुरुषमेधसर्वमेधयोः शू
द्रदानं दृश्यते स पुरुषं प्राचीं दिगिति। न च सर्वेषां योगाद्विशेषादिति विरोधः न हि
क्रीतो दानलब्धो दायागतो दासः कस्याप्यन्यस्य संबंधी यतो हि क्रीतः येन वा प्रति
गृहीतः यस्य वा भागे पितृपर्यागतः संन्यागतस्तस्यैव स इति न तद्दानेन कश्चिद्विरोधः
अथ यद्दक्षिणाकाले सर्वस्वदाने द्रव्याभावात् विश्वजितः समाप्तिः कथं भविष्यतीत्या(
शंकायामाह॥ द्रव्याभाववदंतः तदंतो दक्षिणादानांत एव विश्वजिद्भवति कुतः द्र

कासय० ३ व्याभावात्। सर्वं हि द्रव्यं दत्तं समाप्तिश्चाज्यादिद्रव्यसाध्या। तच्च नास्तीति युक्तमे
वोक्तं दक्षिणादानान्तो भवतीति सर्वः पक्षः॥ सिद्धान्तमाह॥ समाप्तिर्वाऽचोदितादनभ्यु
पेतेः वा शब्दः सर्वपक्षनिरासार्थः समाप्तिरेव विश्वजितः कर्तव्या न दक्षिणादा
नान्तता। कुतः चोदितत्वात् विश्वजिता यजेतेत्यनेनास्यैतत्प्रत्ययेनोपात्तत्वमप्यनभ्यु
3 पदर्शपर्यन्तस्य यागस्य साधनत्वेन विहितत्वात्। तथाऽनभ्युपगते विश्वजितः
समाप्तिः कर्तव्या॥ अनभ्युपगमाद्दुद्देशत्वं वच्छेदे सर्वं परिदधातीति वस्त्वबुध्यते धान
विधिपरे वाक्ये अनभ्युपगमो दृश्यते यतः अतो नाभ्युपदर्शनाद्व्योर्वन्निर्दिश्यते य
द्विश्वजितः समाप्तिः कर्तव्येति॥ किं चादीक्षासु वा पदेशात्। दीक्षास्विव त्वर्थस्य
द्रव्यस्यान्यस्यैव्यपदेशात्। कृत्वर्थमपदिश्यान्यसमाग्न्यादिष्वत्वात् कृत्वर्थमग्न्यो
६ यायथाकालं संपादयन्ति अतस्तद्व्यतिरिक्तमेव सर्वस्वमिति। तस्य वादत्तत्वात्ते
न क्रतुसमाप्तिः कर्तव्येत्यभिप्रायः॥ एवमेवाह जैमिनिः अशेषत्वात्तदन्तं स्यात्कर्मणो द्र
व्यसिद्धित्वादितिसूत्राधिकरणेन कर्मणो भएव यजमानेनात्मीयं धनं वचनेन बलान्निधा
व्यवस्थापिते। इदमेभक्त्यार्थमिदं क्रत्वर्थमिदं दक्षिणागदानार्थमिति। तत्र यद्दक्षि
णादानार्थं सर्वस्वदाने विहितं तदेव सर्वदेयं न क्रत्वर्थं नात्मभक्त्यर्थमिति पार्थसार राम
थिमिश्राः॥ न समत्वात्॥ नैतदेवं पक्षद्वयाद्युक्तं समाप्तिर्वा विश्वजितः कर्तव्येति। कुतः ३

वौ

समत्वात्समं घेत दुभयं। विश्वजिता यजेतेति समाप्तिविधानं। सर्वस्वं ददातीति
सर्वस्वदानविधानं च॥ नुभयोरपि श्रुतत्वात्। अतो विरोधाद्विकल्प एव भविनुमुक्तः।
सर्वस्वदानं वा कर्तव्यं समाप्तिर्वा कर्तव्येति मध्ये पुनः सर्वपदस्य सूत्रे इदमेव सूत्रं पु
नरधीत्य सिद्धांतपरत्वेन व्याख्यायते। समबलत्वाद्विकल्प इत्युक्तं न चैतदुभयं स
मबलं। यतो विश्वजिता यजेतेति प्रथमो विधिः प्रथमो विधिः प्रधानविधिश्च। स
र्वस्वं ददातीति गुणविधिः। पश्चात्कालभावी च अतः सर्वकालीनस्य प्रधानविधे
र्बलवत्त्वात्ततः प्रतीतासमाप्तिरेव युक्ता विकल्पश्च समबलत्वे सति भवति। न चानयोः
समबलतानुक्रमपुनरुक्तिनिरस्तत्वात्। अथेदं चिंत्यते। विश्वजिति सहस्रं सर्वं वेदं संवा
ददातीति विकल्पमनुक्तः तत्र किं सहस्रान्न्यूनमपि सर्वस्वं भवति नु तत्सहस्रादतिरि-   ३ क्र९
मेवेति। तच्च सूत्रेणोपवर्ण्यते। यौगिमारो सर्वमविशेषात्। सर्वस्वपरिमाणेन
अपेक्षिते सर्वस्य यावत् धनं गृहे तदानीं स्वकीयत्वेन विद्यमानं भवति सुवर्ण
रूप्यताम्रगवाश्ववस्त्रधान्यादि तत्सर्वं देयं सहस्रान्न्यूनमतिरिक्तं वा ऊतः। अ
विशेषात्। न च सर्वस्वं ददातीति वाक्ये विशेषः श्रुतो येन सहस्रान्न्यूनमतिरिक्तं
वेति विशेषं अवधार्यते। अतो यस्य यावत् स्वं तेन तत् सर्वं देयमिति प्राप्ते विश्वजि
ति विशेषमह॥ अपि वा पूर्वत्स्यतुत्पत्तात्। वाशब्दः पक्षांतरपरिग्रहे। अपि वा

कृ

कास्रा०
४

५

मेवसहस्रं सर्ववेदसं विश्वजितिदेयं॥ न सहस्रान्यूनं कुतः प्रकृत्यानुग्रहात्।
सर्ववेदसदाने प्रभूतस्य सहस्रदाने न तस्यानुग्रहदर्शनात्। कोऽर्हति मनुष्यः सर्ववेदसं
दातुं तस्मात्सहस्रं देयमिति। एतच्च तदैवोपपद्यते यदा सहस्राद्धिकं सर्ववेदसं भ
वतीति। अतो विश्वजिति नियमेन सहस्रादधिकमेव सर्ववेदसं देयमिति। अन्य
चापि प्रतिहर्त्रपच्छेदादेवमेव सहस्रादधिकस्यैव सर्ववेदसस्य प्राप्तौ स
त्यामाह॥ नानित्यत्वात्। सहस्रादधिकमेव सर्ववेदसमिति पद्धतां। तन्नोत्तरं
अनित्यत्वात् न हि नित्यैकसंख्यापरिमाणविशेषे सर्ववेदसशब्दः प्रसिद्धः ये
नैवं निश्चीयते सहस्रादधिकमेवेति। अतो यस्य यावत्स्वं सहस्रान्यूनमधिकं वा
तत्सर्वं सर्वस्वदानविधौ प्रतिहर्त्रपच्छेदाद्दे॥ कर्मशब्दाच्च॥ अस्ति चायं लोके
कर्मशब्दो व्यापारशब्दः सर्वस्वमनेन दत्तमिति। यस्यापि गृहे स्वल्पमपि धनं भव
ति शतादपि न्यूनं तावति सर्वस्मिन्दत्ते लोका एवं प्रयुंजते सर्वस्वमनेन दत्तमिति
अतोऽपि कारणात् सहस्रान्यूनमपि सर्ववेदसं भवति। अतो विश्वजिति लिंगव
शात् सहस्रादधिकमेव सर्ववेदसं देयं। अन्यत्रानियम इति। सिद्धं॥ अथ सर्वस्वद
नप्रसंगे विश्वजिदनंतरं कर्त्तव्यमाह॥ अवभृथादुदेत्य परोहिणोपावसछयौ सकर्मं
पुच्छावच्छाते परिदधाते। अवभृथादुदेत्यावभृथादुत्तीर्य दीयमानां तं परि समा राम
४

प्परोहि रापौरत्नावस्मे वस छ ब्ध्रौवस स्पल्व चौवर्म गोसक स्मिपु छौकस्मोप्यंपुछे
न च स हि ते पत्नी यजमानो ऽपरिद्ध्यातेः ऋच्छाते ऋच्छिन्नोपशुभि वो ऽसपक्ष्यातेर
स्याहुर्यः सर्वं ददाति छ चोपरिधत्ते रतितां ओ सर्वस्वदृनपक्षे ऋतत्वात सर्वस्वद
नपक्षएवेतम्दुःख वतिभ स हस्रदृनपक्षे ॥ द्वादशरात्रं परिवसत्सुखावदं त्रिबि
भ्रतभौदुवरीं वा ततो यजमानो विश्वजित्समाप्यनंतरं द्वादशरात्रं द्वादशं होरात्रा
णि वस्यमाणोवु स्थानेषु परिवसति किं उर्वेन्द्रउर्ववदं त्रि ॐ इंवरीं उ वर वक्त्रो उ
वयवघटितां ना ऋाभ्रत्रिबिभ्रतह स्तेन धारपन नुखायारवनु खावत तेनो श्वासं
बोधिनी यादृशी ऋभिः तादृशी नु खावदिस्यनेना तिदिश्यते ते न वैरात्वीसु
षिराकल्माषी ऋभावं ऋकल्माषीनु भयतस्तौ ह्लौ प्रादेशमात्री ऋरत्नी
मात्री चेत्येतावद खावदित्यनेनापि दिश्यते। खनिचैगाजीवति तिप्रकृत कितदे
खनित्रमि सयेहिते ऋहनुभयतः क्षुदभ्रिभंवतीतितां अभ्रकतत्वा तेयावर्षदे त
गस्तत्रं नुभयतः क्षुदभ्रिर्भवतीतिवैणवी कल्माषीति शांडिल्यो यायाका चेति धानं
ड्ड यव्वरति ॐ वरीमपिमपित र्घविधामेव ॥ नुब्री यंच नु ब्रीयंचा नुब्रीयः
शिरोवेष्टनवस्त्रं तत्रिविभ्र यजमानो द्वादं परिवसति नुब्रीयं बिभर्ति शिल्पत्वा
येतितांसे श्रवणातां शिल्पत्वाय वैदि आपरोहि रात्रावत्सलव सकाशाद्धेल स

कात्या०
५

रण्यात्॥ तिस्रस्तिस्रः। वक्ष्यमाणानामौदुंबरादीनां स्थानानां मध्ये एकैकस्मिन्स्था
नेयजमानस्तिस्रस्तिस्रो रात्रीर्वसति॥ औदुंबरे मूलफलभक्षः। उदुंबरः सप्तमि
न्देशे रसोदुंबरो देशः। तत्रौदुंबरबहुले देशे अरण्ये तिस्रो रात्रीर्वसति कौ
दृशः मूलफलभक्षः। मूलानि चार्द्रकवासूरणकंदादीनि फलानि च पिप्पलोदुं ८ना
बरादीनि भक्षयन्तिष्ठतीति मूलफलभक्षो मूलफलाशन इत्यर्थः। तथाहि
ताये। अरण्ये तिस्रो वसत्यारण्ये तामिरन्नाद्यमवरुंधे नुदुंबरे वसत खनित्रे
णाजीवे कुंभ्यन्नस्तुदुंबरोऽभि भवति। तथा च छंदोगसूत्रं। अरण्ये तिस्रो वसतो
स्तुदुंबरे वसेत। नुदुंबराभावे तूदुंबरशाखानि खनेपुरीति पूर्वेणैव तत्र ब्राह्मणा
अरण्ये तिस्रो रात्रीर्वसतीति नुदुंबरे वसेदिति चुपदुक्तो तदरण्ये तिस्रनुदुंबर
चतिस्र इत्येवं न। किं तर्हि अरण्ये वनेवनेप नुदुंबरस्तत्र तन्मूले वसेदित्यर्थः कुत
एतदेवं घदृशोत्तरात्रयोभवतिवक्ष्यमाणात्वात। एतच्छुतिसूत्रानुसारेणौदु
बरे मूलफलभक्ष इत्येवं पाठस्तत्रौदुंबर इति। तथा छंदोगसूत्रं॥ खनित्रेण
जीवतीति तत्र खानिस्पानिस्पात्तेन जीवेत खाल्यं खननेन लभ्यं कंदमूलादि
तद्भक्षो खायतेन जीवेदित्यर्थः खान्याभावे धान्यपात्रेण खायते खानं जी
वेत् यदि तस्मिन्नरण्ये कंदमूलादि खाद्यमन्नं न स्यात्। तदा धान्यपात्रेण भक्षि म एम
५

६

ध्येप्रथमं निखायतैर्द्धान्यपार्श्वेस्वखानं ताभ्यम्भानुखायो खायज्ञोवेत। एतं र्थमेव तद्य
भिधारणामुक्तं। निषादाः एवं अरण्ये पतिस्त्रे रात्रीः प्रोष्य ततश्चतुर्थ्यां घा। तिस्रो रात्रीर्नि
षादे निषादानां समीपे च यजमानो वसति तथा च छंदोगसूत्रं निषादेषु तिस्रो रात्री
र्वसतीति यावर्द्धितो निषादग्रामस्य वसेत इति।। जने ततः सप्तम्यां घस्तिस्रो जने वस
सति। समानजने ततो दशम्यां घास्तिस्रो रात्रीः समानजने वसति जनसमानज
नौ नशब्दार्थयो[illegible]कि प्रसिद्धत्वात्तदर्थस्वयमेवाह। वैश्यो जनो राजन्यः समानज
नः अतः। जनशब्देन वैश्य उच्यते। समानजनशब्देन राजन्यः क्षत्रिय इति। कुत एत
त्। अतः एवं हि शाखांतरे श्रूयते अत्र छंदोगसूत्रं। जने तिस्रो वसती राजन्यबंधुर्जं
नो ब्राह्मणाः समानजन इति शांडिल्यः विवाह्यो जनः सगोत्रः समानजन इति धानं
जय्यः। विवाह्यो विवाहार्हः असमानगोत्रप्रवरः प्रतिवेशो जनपदो जनो यत्र वसेत् स स
मानजन इति शांडिल्यायनः प्रतिवेशः समीपवर्तिता एते धर्माः सर्ववेदसदक्षि
णानां सर्वेषां सर्वेयज्ञानां शाखांतरदृष्टानामपि सर्वस्वदक्षिणानामेतद्धर्मप्राप्त्यर्थं।
अथ निषादानां ग्रामसमीपे वसतो यजमानस्य भोजने नियममाह।। ग्राम्याभोज
नं निषादान्नं निषादानां संबंधि यच्छ्याम्यं ब्रीहियवगोधूमादि तस्य भोजनं यजमाने
न तत्र वसता कर्तव्यं ग्राम्यस्य निषेधात् आरण्यस्य नीवारादेर्न निषेधः। अतनुरूपं

न

कात्या० ६

दोगसूत्रे ते यां नाम मारण्यं भुंजीत नैवारश्यामाकं मार्गमिति। ते यानि ग्राम्यदूतानि यस्य दार
ण्यान्नं तैलाभं इध्मया भुंजीत। माङ्गं मृग मांसा भ्रन्नश्यामाक नैवारादीनां स्वयमेवा
रण्यत्वात्। दारण्य ग्रहणं ग्रामेण वारणादारण्ये भवं स्वयमेव लब्धं तत्र भुंजीत मु
नैनिषादे भ्यो गृह्णीयादित्येवमर्थं॥ सन्नयाग्य्यानं चानिषादसमीपे वसतो य
६ जमानेन न सन्नेयेन पात्रेणायानं नुदकादिपानं कर्तव्यं न सन्नेयेनापि वेदितिस्मृ
तेरागात्॥ संवत्सरं न याचेत सर्वस्वदक्षिणा विश्वजिद्याजी संवत्सरं वर्षपर्यंतकाले
चो ९ किंचनन याचीत किमपि हिरण्यादि न प्रार्थयेत। संवत्सरं न याचेदिति श्रुतत्वात्॥ दीयमा चे
व नं न प्रत्याचक्षीत अयाचितमेकेनचित् किंचिद्धान्यहिरण्यादि दीयमानं न प्रत्याचक्षीत
न निराकुर्यात्। नोदीयमानं प्रविनुदेदन्नाद्यस्याप्रतिनोदयेति तांडिश्रुतत्वात्।
॥ एवं परनिरपेक्षे अभिजिद्विश्वजितौ विधायाधुना तयोर्दशरात्रसंमासव संहतयोः
प्रयोगमाह॥ यमाभ्यां वा यजेत। अथवा विश्वजिदभिजिद्भ्यां यमाभ्यां दशरात्रसं
मासव तवत संहताभ्यां यजेत नैकैकिनाप्यमाभ्यां यजेतेताभ्यां समस्या इति तांडिश्रु
तत्वात्॥ अथयमाभ्यां यजने पक्षद्वयमाह॥ पूर्वापराभ्यां पुनर्वा अभिजिद्विश्वजिद्भ्यां ध्र
यमाभ्यां यजमानः पूर्वापराभ्यां यजेत पूर्वमभिजिता तस्यानन्तरमवश्यं विश्वजिता एम
यजेतेत्यर्थः। एतौ हि दशरात्रसंमासव संहतावेव फलसाधकाविति भावः। अथ ६

अ

वायुगपत्सहैवाभिजिद्विश्वजिद्भ्यां यजेत तथाच छंदोगसूत्रं। विश्वजिदभिजिद्भ्यां
यमाभ्यां यजमानः सर्वापराभ्यां यजेतेति धानंजप्यो युगपदिति शांडिल्य इति पदा
तरमपि आह। कर्मलघुमाभ्यां यजेतेति। तेन नावश्यं संहतयोरेतत्फलसाधनत्वं अपि
तु पृथक्साधनत्वमपि तस्मादन्यतरपरिहारेणान्यतरप्रयोगोपि कर्तुं शक्यत
इत्यर्थः। तत्र सर्वापरप्रयोगपक्षे विशेषो नास्ति। युगपत्प्रयोगपक्षे विशेषमाह॥
दक्षिणोत्तरे देवयजने। युगपत्पक्षे दक्षिणोत्तरे द्वे देवयजने द्वयोर्यज्ञयोर्भवतः। क
या स्य दक्षिणं कस्य चोत्तरमित्याशंकामाह॥ दक्षिणमभिजितः अभिजितो देवयज
नं दक्षिणं भवति अर्थाद्विश्वजित उत्तरमिति सिध्यति॥ पत्नीशालमुत्त
रं षोडशषोडश ब्रह्मादयः पृथक्कर्वतीसमर्था॥ तत एव वा प्रभूतत्वात्। अथवा। एवंवि
भवंति नुभयत्र यज्ञद्वयेपि ऋतः प्रभूतत्वात् प्रभवंति हितएव ब्रह्मादय नुभयत्रैक
चे मेकं तु अग्निमध्ये दक्षिणोत्तरे देवयजने आधुर्यंवप्रति प्रस्थाता करोति मैत्रावरुणो हो
त्रं ब्राह्मणाछंसी ब्रह्मत्वं। प्रस्तोता औ[illegible]त्रमिति। एतत्स्वपदार्थानुकुर्वंति। दक्षि ष्ठे
णे देवयजने तृतीयाद्वितीयानां पदार्थान् कुर्वंति स्वपदार्थान्[illegible] अनुत्तरे चतुर्थी
स्तृतीयानां पदार्थान्स्वपदार्थांश्च कुर्वंति पदार्थानां योगपद्ये विरोधादेवं भव
ति। यत्रायोगपद्यं तत्र मुख्यानामेव कर्तृत्वं॥ एवमूहित्वा संदेहकर्मकर्तव्यं॥ वीहिवेदि

रे॥ उत्तरे विश्वजितो देवयजने पत्नीशालं पत्नीशाला भवति। नानार्त्विजः॥ नानापदार्थत्विजो भवंति उभयत्र च

कात्या० ७

कानि समान्यानि। यानि कर्म्माणि बाहिर्वेदिकानि दीक्षणीयाप्रायणीयातिथ्याघर्मो
पसदुदयनीयोदवसानीयादीनि तानि समानानि साधारणान्येवं त्रेणाभ्यो भवं तं २
तिनयं यक्रु॥ नानेतराणि। इतराणि बाहिर्वेदिकेभ्योऽन्यानि अंतर्वेदिकानि अग्नी
ग्न ४ षोमीय यादीनि तानि नानानाव्यवतिरस्यर्थः॥ कर्मसंनिपाते दर्शं दर्शं माभि
जितः अभिचवाधिस्माद्युपस्थानादौ सर्वेषां साधकस्य संनिपाते नु भयज्ञा संबाधि
धिनोः कर्मणोरेककालोपनिपाते अभिजितः सर्वं कर्म कर्त्तव्यं ततः पश्चाद्धृ
ठ्ठ जित इति सर्वे दाक्षिणाभिषवं ज्ञैत्वाप श्चादुत्तरे। प्रथमं दक्षिणो अस्योपस्थानं ततनुत्तरे धि
दाक्षिणा देवयजनाध्यवसानं प्रथमं ततनुत्तरे। नु परवदेशे दयोः सोमयोर्द्धिनोर्च
नुजे हितं गृहीत्वा न्वारभस्व इत्यादि दक्षिणो सोमविक्रयिणा आहननात् तं ज्ञ त्वा ततनुत्त
रे। ततएवमेव सोमप्रवेशनांतं पदार्थका क्रमेण। एकस्यामेव शालायां द्वयोः सोमयोः
क्रमेण प्रवेशनं हविर्धानप्रचालनाद्यालंभनांतं प्रथमं दक्षिणा ततनुत्तरे। एवमेवा
परवखननेऽधिषवणे वापे चाग्नीषोमप्रणयने सोमहरणांतेऽभेदः। सोमस्याह
विर्धानयोः अभेणान सिन्नापनं नुत्तौ गुलिविसर्गः अन्यारंभणा च खाले दाणायो
भेदः। पशुनयने शाधने च। एकः शामित्रनुत्कार आत्वालबहिर्वेदिकत्वात्। एग म
एवं यत्र यत्र कर्मसंनिपातस्तत्र तत्राभेदः। अन्यत्र यौगपद्यं ज्ञेतुयाज्यावरणोपायावे ७

क ख्य

तिकर्मा। गिकरोतित स्मत्यंवेतिवत्साग्नि। स्तोत्रे संनिपातः॥ पृथक्सहस्रदक्षिणा॥
पृथक्गवांदेसहस्रंदक्षिणा सहस्रमभिजितः सहस्रं विश्वजित इति। अतश्चप
सहस्रसंयुक्तांतदुभयत्रभेदेनभवति। अश्वदाम्य अहगांतिस्त्रोनुध्यामीवेति त्रैधात वे
वीतुकोहैर्वेदिकीतेनतं त्रैगौकेवभवति। दक्षिणा दानंतूभयत्रमुख्यकार्दक्षिणामेवन
विरोधकर्न्दक्षिणां पत्नीसंयाज्ञदुक्षिणाग्निहोत्रहोमानुत्तरएवानुभयत्रनवेरवस च
मिच्छयजूर्छि। सागिविलोवेदांतवैदिकलेपिनपंचसुभेदःशिरासिसांयाा
मिकाणिभेदेनोणाकृदोनांकरणामिसेवंविचार्यविचार्यसर्वेकार्यमिति अत्र
छंदोगसत्रो अभिजितो दक्षिणा देवयजनं स्यादि विश्वजितनुत्तरं तस्रतिपत्नीशा
लास्यान्नानविंजोयच्छांतवैदिकमेतदपिनानाप्पथुगिसर्थः। अथपद्धहेंघ वे
वांतत। अभिजितः सर्वेसर्वेकर्मसंतिष्ठतविश्वजितनुत्तरं तयोः पृथक्सहस्र
दक्षिणा इति। अत्रत्रविजं साधारणापदो नास्ति अथसर्वजि संज्ञ मेका
रमाह। सर्वजित्समहाव्रतः संवत्सरदीक्षाः सत्साहतिपवस्तिसनुपसदः
आ पञ्चसर्वजित् संज्ञकरवाहोग्निष्टोमसंस्थो भवति कीदृशः संवत्सरदीक्षः
संवत्सरदीक्षापस्रोसततया। पुनः कीदृशः। समहाव्रतः महाव्रतमितिस्तोत्रस्य
संज्ञातेनसहवर्त्ततइति समहाव्रतः अस्मिन्महाव्रततसंज्ञं साममध्यंभवतो

कात्या० ६ सर्वः पुनः कीदृशः सप्ताहाति यवः। संवत्सरा हि द्वंसस्राहस्पतिकाम्यसस्व व सुस्साभ
वतीति तयोः सत्त्यानाम ऊम ध्यति स्वनुयसदः चतस्योदीक्षाः अथ अवाप्य षडुपसदः
8 एकादीक्षेति। ततश्च एकेनाह्ना धिकं संवत्सरं अस्यादीक्षाः षडुपसत्य इति ज्ञु
स्वनुपसद इति [illegible] प द्वे चतुर्भिर्होमैर्भि [illegible] व सरं दीक्षेतिप [illegible] पाक
ष्टि रसां [illegible] रोन शततं तुनोत्यानि माज्ञोलीय तस्मान्निर्द्धतीत्यंतस्य [illegible] मत्रैष प
कोले भवति सवनीयपशुस्त्वाग्नेय एककपालो वा प्राप्तो पत्नुपालं भ्य इति तु महाव्र
तसंज्ञकानि विहितः। न चायं महाव्रतसंज्ञः किं तर्हि सर्वजिद्यायावचनादस्मिन्महाव्र
कं तं स्तोत्रं पृष्ठ्यं भवति अत एव विनरं द्व इत्यादि स्तवकं यहणाम च न भवति यज्ञ
स्यामहाव्रतत्वात् सहाव्रते च तस्य विधानात् स्तोत्रं च धर्मो स्तु भवं स्तवाते षां स्तोत्र
संयोगेन विधानात्। अत एवाग्निरथ वानियमः। समहाव्रतेऽनियम इति वच
नात्। अथ वाशांखायनसंचेमहाव्रतीयमहरिति वचनात्त् ध्याति स्वनुपसद्
व्रतस्यैकाहिकस्येति वचनाद्यास्याकृत्पि महाव्रतसंज्ञा भवति ततश्च तदुपालम्भ्या
यहणामपि भवतीति। द्विषः संवगिति मं चेराद्धिघ [illegible] मे शब्भ [illegible] राग चा अ शुं
थाऽसि नेव सर्वजितिद्धि हारीपक्षांतरमाह॥ अग्निव धादीक्षा॥ वा अथवा
सर्वजिति अग्निव घायनपनवदेवसंवत्सरमेवदीक्षा भवंति। नैवाधिकं नापि राम ६

चतुर्भिरधिकमिति॥ अग्निवदित्यपदेशात् अपि संवत्सरमतीतो संवत्सर
मतोपि लोदयापि -- मंत्यमियंता: सर्वे दीक्षा ण क्षा अत्र भवंति॥ उपसदां नुति
स्त्र उपसदः षड्डोतिविकल्पः। स्थितएव॥ अथतो द्यवाहानां पंचविंशो ग्निर्भो
म: सर्वजितावै देवा: सर्वमजयं सर्वस्याप्ये सर्वस्य जित्यै सर्वमेतेनाप्नोति
वे सर्वं जितो मल्व्रतसंज्ञं स्तोत्रपदं भवति माहेंद्रं स्तोत्रं वतीत्यर्थ:॥ कस्य ङ
कारे गाविस्तरे साम महाव्रतस्तोत्रस्य स्वरूपमुक्तं॥ ३ इमिकुत्थिनो वहादि
मि द्वादधीयोउ येदभिक्रतामयीतित्रिव।। छिरोगायत्रं॥ पंचदशं रथंतरं
दक्षिण: पक्षो वृहदुत्तर: कविंशो भरण्पु छं॥ तद्दिशा समनुवंन्तेषु छंदांसि पंच ति
विंशत्यात्मा राजनमितिनिर्आर आधवये पंचैलेनरूप्यमाणाना पहि समपंच अ
कमुक्तं स्तोमकंमहाव्रतस्तोत्रमितिकस्यार्थ:॥ अथतत्रशाखाविधत्ते अर्कस्यारय
श्रुकू इति॥ अर्कय॥ अर्कसूर्य: तत्स्वंविधिवहतो महस्वाल्पमहदुक्थं नाम्यतरति॥ अ
त्रच्छंदोगसूत्रेविशेष:॥ व्रतवत्सु सर्वेष्यमावास्या पांदी दिवा मावधो
न सांवत्सरिकेष्वेष्वत्रेतिगौतम:॥ व्रतवत्स्विष्यपदेशात्स्वत्र व्रतेन प्राप्नो तं
ति तदर्थे सर्वेष्यहयां तेनव्रतवत्सुवंस्वंतत्र व्रतेस्यर्थ:॥ सहसु सामिं षडहा
निसंवत्सरादधिकानि कृत्वोपनिषद:॥ समाप्तोवा संवत्सरं राचिसत्रे

तर

कात्या०
२

पुराचज्ञानं वीराणीपुर्यं यथाज्ञातेनु प्रथमेयं चदराराच्चीदीक्षेरन।। प्रथमे पंच
दक्षाराच्चेमलाव्रतस्य पिसतिय याज्ञोतिदीक्षेरंचयासच्चेषु ज्ञातिः न घथाज्ञाति।।
तेषां द्वादशादीक्षास्त्प्योपसदोनादेषु इति।। सर्व च वाय यथाज्ञायस्य च केषु
येदं तमिति धा नेज्ञ या उनुपेत वे धाद्यीति रात्रिस्व इति।। तेन पदि स्य न्य सचा
दीक्षा चिसर्वं महाव्रतमुपेतकृतं अथ वानुपेतम कृतमपि तदपि सर्वत्र य
थाज्ञात्येव दीक्षा भवति।। तेन व्रतस्य काहिकल्येएकादीक्षा अहीनमध्येव्र
तेत्रिय मासो आहीग्निमादीत्वा दीक्षाः सुत्योपसछेणरोतिं चोषु साविक्षा स
द्वादशाद्दीक्षा भवंतीति सिद्ध।। तेन संवत्सरदीक्षाक्षानियमो न भवति।। त
था।। तिस्र उपसदो व्रतस्य काहिकस्य गौतमीन येन विधाने नाव[illegible]द्वादशा
वेति।। अत्र दक्षिणा विशेषमाह।। १ प्रातःप्रचरणमव्यर्यवेददात्यसौ वीय
माने।। अ।सिन्सर्वं जिघज्ञे अग्नौवीयमानेगवां प्रातमत्पुत्तं रथवरता
६ वेधुर्यवे घजमानो ददाति।। वीयमान इति वर्तमानकालनिर्देशात् आह
पत्नाप घ्रानमारभ्य धिष्ण्यवपन पर्यंते कर्म[illegible]पमारोपदछाभवेति त्वाद
प।। प्रत्यमोपधाना दुल्भ्यावजमिति धानाश्चः अथ यपघ म्बं पुत्तं बापुत्तं राम
वादास्यं स्यादयाद्वितीया जुहु यादि स्वत्र दोस्यन्ति तिवचनात् छं ताम्र ६

पि इ कि ३

रथ्यदानास्त्वागयन्नो अग्नि[illegible]ितस्याहुतिर्होतव्या॥ साचाहवनीय एव।।तदानीमाग्नी
ध्रीयस्याभावात्॥ उद्गात्रे व्रतकाले महाव्रतस्तोत्रकाले उद्गात्रे राताश्वरथं दद्यात
॥ होत्रे श्रुग्द्विणालो। महाव्रतानन्तरमेव यन्महदुक्थ्याख्यं शस्त्रं तस्मिं छस्यमाने
होत्रे राताश्वरथं दद्यात॥ ततो ब्रह्मणे तत इति महदुक्थ्यशंसनानंतरं प्राजापत्यहोमाद्ब्र
ह्मणे राताश्वरथं दद्यात॥ अथवा ततो होतुर्द्दानानंतरमेव ब्रह्मणे दातव्यमिति॥ अत्र
२८ छंदोगसूत्रं॥ तत्र ब्रह्मणे अश्वरथं युतं च दद्यात॥ तथाग्निचिन्वते ध्वर्यवे॥ पृष्ठेन स्तुवानां
नायामुद्गात्रे॥ तथानुब्रुवते होत्र इति॥ दक्षिणाकाले सर्वेभ्यः सहस्रं॥ प्राकृते दक्षिणाकाले
माध्यंदिने सवने मरुत्वतीय यागात्प्राक् सर्वेभ्यः षोडशभ्यो ऋत्विग्भ्यः गवां सहस्रं दक्षि
णां दद्यात॥ तथाचलाघायनः सर्वेभ्यः सहस्रमिति॥ प्रकृतेभ्य एवमाभूदिति सर्वग्रहणं॥
इयं च क्रतुदक्षिणा पूर्वोक्तालंदक्षिणा कथमेव न दृश्यते॥ यत्क्रतुदक्षिणीयमिति। उच्यते
सर्ववेदसदक्षिणेणे वेति सूत्राम्न॥ सहस्रदक्षिणां वा वृत्तिर्भ सर्ववेदस दक्षिणां वेत्यर्थः॥ अ
त्र एतस्या एव दक्षिणायाः क्रतुविनोषणालेन निर्देशादियमेव क्रतुदक्षिणेति गम्यते
॥ अथसाए—य नाश्वत्तु संख्यानेकाहानाह॥ साहस्राश्चत्वारः। सहस्रदक्षिणाः॥
चत्वारः॥ क्रतवः साहस्रसंज्ञायकाः भवंति। ते च सहस्रदक्षिणाभवंति॥ गवां सहस्र
सहस्रं प्रत्येकं तेषां दक्षिणादेयमित्यर्थः॥ तथाचलाघायनः॥ सर्वे साहस्राः प्रत्यक्ष

हस्रदक्षिणाः इति ॥ सहस्र इति चतुर्संस्था सामान्यसंज्ञा उक्ता ॥ तृतीय उक्थ्यः ॥ तेषां चतुर्स्मा
मध्ये तृतीयः साहस्रो विश्वज्योतिः संज्ञक उक्थ्यसंस्थो भवति ॥ अन्ये त्रयोऽग्निष्टोमसं
स्था एव ॥ अधुना तेषां सहस्राणां विभागनामान्याह ॥ ज्योतिः सर्वज्योतिर्विश्वज्योतिस्त्रि
स रात्रसंमितः ॥ प्रथमो ज्योतिः संज्ञः ॥ द्वितीयः सर्वज्योतिः ॥ तृतीयो विश्वज्योतिरुक्थ्यसंस्थः
चतुर्थस्त्रिरात्रसंमितसंज्ञ इति तांश्च अनेनैव क्रमेणावर्तुर्णां श्रुतत्वात् ॥ अथैष ज्यो
तिरिति ॥ तथा उपसदि सहस्रं प्रातरनुवाकमन्वाह तदसौ लोकः सहस्रं दक्षिणा तदन्तरि
क्षं सहस्रमेतान्यक्षराणि तदयं लोक एषु लोकेषु प्रतितिष्ठति य एवं वेदेति ॥ अथैष सर्व
ज्योतिः सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोतीति ॥ एकविंशोऽग्निष्टोमो भवतीति
च तथा ॥ अथैष विश्वज्योतिरुक्थ्य इति ॥ तथा ॥ यो वा अग्निष्टोमे त्रिरात्रं प्रोतं वि
द्यात्सोऽग्निष्टोमे सहस्रं दद्यात्त्रिरात्रायतनं हि सहस्रमिति ॥ त्रिरात्रेणाप्यं त्रिरात्रे
णा संमितः तत्तुल्यफलस्त्रिरात्रसंमित इति ॥ एषु छंदोगानां वह्वृचां वहवो विरो
धाः संति ॥ अध्वर्युस्मातु सहस्रदक्षिणासंयुक्तसंस्थदाम्यग्रहणंतिस्रोनूवंध्या
स्तै धातवीस्येतावच्चतुर्थ्येपि साहस्रेषु भवति ॥ अधुना साद्यःक्रसंज्ञान्यडेकाना
क्षा ह ॥ अथ [illegible] का ॥ साद्यःक्रसंज्ञा प्रकृतव एकाहा भवंति ॥ प्रथमः स्वर्गकामपशुका
मस्यातव्यवतां प्रथमः ॥ स्वर्गकामपशुकामस्य भ्रातृव्यवतश्च यजमानस्य भवती

ॐ

स्वर्गकामो यजेत पशुकामो यजेतेति तादर्थ्यश्रुतत्वात्॥ एकललाटोऽश्वो दक्षिणा॥ एकः
श्री सौवर्णाभरणवि[?]षः स ललाटे यस्यासौ एकललाटः॥ एवंविधः श्वेतः शुक्लवर्णो
श्वोऽत्र दक्षिणा भवति॥ अश्वाभावे गौः॥ यद्यश्वो न भवति तदा एकललाटं ऐश्वेतो गौर्द व
क्षिणा॥ तस्मात्सद्यः क्रियायां श्वेतो दक्षिणा तस्य एकः पुर[?]ऽद्भवति तदेतस्य रूपं क्रिय स्ता ५
ते यएयतपयाति यद्यश्वः श्वेतं न विदेदपि गोरेण श्वेतः स्यात्तस्य रूपः पुस्ताद्भवतीति
श्रुतत्वात् तमुद्गात्रे ददाति तमश्वं गां वा उद्गात्रे एकस्मै दद्यात् इतरेषां। ऋत्विजो यथा संतोष
मायांति तथा तेभ्यो यत्किंचिदन्नं दद्यादिति विधिरन्वेयः॥ तथाच सूत्रे तत्राश्वः श्वेतए
चैव तस्य दक्षिणा तमुद्गात्रे दद्यात् किंचि[?]तरेभ्य इति॥ प्राकृतस्याप्निवृत्तिर्हृलत योगात्॥
प्राकृतस्य दक्षिणाजातस्य हिरण्यादेरृत्विक्षु निवृत्तिर्न भवति॥ कुतः उ[?]द्गात्रेयोगा
त्॥ अश्वस्योद्गात्रायोगानुसमु[?]द्गात्रे ददातीति॥ एवं प्राप्ते॥ अह॥ निवृत्तिः स्यानुयो
गात्॥ प्राकृतस्य हिरण्यादेर्दक्षिणाजातस्य निवृत्तिर्भवति। अश्वस्य तामनुयोगाऽनुना
प्र मा[?]त्रेयणासंबंधात्॥ तस्मात्सद्यः क्रियायां श्वेतो दक्षिणा। अतोऽपि चित्विं दक्षिणायु
युक्तं तन्निवर्तत इति॥ ननु यद्यश्वः सकलस्य दक्षिणाजातस्य निवर्तकस्तर्हि श्योऽन्या
भ्योऽप्यृत्विग्भ्यो विभज्य देय इति प्राप्ते अह॥ वचनादेकस्य॥ तमुद्गात्रे ददातीति वच
नादेकस्य दानं॥ इतरेषां वमुका[?]तरेण संतोषणं कर्त्तव्यमिति प्रागुक्तं॥ अथाग्धिती

णं

का०सा०
११

यं साधश्च माह दीर्घव्याधिप्रतिष्ठाकामाचाघकामानां द्वितीय:॥ द्वितीयं पाघं ज्योति
र्ष्ठ्याधेसर्वेदरोगिणां प्रतिष्ठाकामस्यान्नाद्यकामस्य च भवति॥ एतस्यैव चैकविंशभूमि
ष्ठोम सामकला आमयाविनयाजयेदिति॥ तथा एतेनैवान्नाद्यकामेवा प्रतिष्ठाकामा
वा यजेतेति तं अभ्यवरात॥ अश्वेकविंशे नुदक्षिणा॥ अत्र द्वितीये साघं ज्ञ अश्वभ्यै
कविंशि श्वादक्षिणा॥ अश्व एकविंशेण यसांगयोता अश्वैकविंशुणां विंशति
गावं एकविंशोश्वरस्यर्थं॥ अश्वोवा॥ अथवा एक एवाश्वो दक्षिणा॥ अथ
तृतीयं साघं ज्ञमाह॥ हीनस्यानुक्रीं॥ अनुक्रीर्तामा साघा ज्ञं सहीनस्य भवति
॥ यो यजमानो हीनो निकृष्टो नुजाद्यध गरस्व भवति तस्यो ज्ञलवप्राप्त्यर्थम
यं भवतीत्यर्थः॥ भगवतां यथा॥ अथैवोगिरसामनुक्रीर्तेनवा अंगिरस आदि
त्यामाधुवं स्योहीना आनुजावरस्व स्यात्स एतेनयजेति॥ यो यजमानो निलष्ट आ ते
नुजावरस्व अनुजाद्यवरस्व स्यात्स एतेनयजेतेत्यर्थः॥ अ अंछन्दोगसूत्रेवि
शेषः एकरात्रीणां घहीनोनुक्रोः तांगिरस आदित्येभ्यः अश्वः सुत्यामितिव्याह॥
एकयाग आग्निवत्सत इत्येकरात्रीणां॥ घाभ्या महाभ्यांनिर्वर्त्यते व्यहीनां ते गिर
सां आदित्येभ्यः भ्वः सुत्यामि तिति ब्राह्मणमाह॥ यदि द्वितीयां रात्रिमायधतेत राम ११
दाकालातिक्रमं स्यादिसेवं ज्ञापनार्थमेकरात्रीणाइति॥ तस्यत्रयप्रभृत्सतारस्य:

थां १

स्यादिति॥ गौतमः अपरेषु क्रमशः आनुकीर्त्याख्या॥ उपवसथ्यांतःपूर्वमहास्यावि
ति धानंजय्यः अद्यः सुत्यामिति घाहेति॥ अद्यः क्रीयप्रावुवन्निलयर्भ्यःत॥ तेसघः परि विष्पर
क्रीयते तिप्रथमस्य सघस्तांदपूर्यते॥ घहीन खातुजघन्यतरे गिरसोक्रीरां स्त
स्मादनुक्रीरित्याख्येति॥ साध्व॑ शतंदक्षिणासा अश्वं एकेनाश्वेन सहितं गवां श
तस्यानुक्रियोदक्षिणादया॥ अश्वोवा अथवा एक एवाश्वो दक्षिणा॥ अथ चतु
ष्क र्थं साघक्रमाह॥ विश्वजिच्छिल्पः विश्वजिच्छिल्पसंज्ञः चतुर्थः साघक्रो भवति।
अथैवविश्वजिच्छिल्प इति तां प्रश्नकतत्यात॥ विश्वजिन्नामासवाशिल्पश्चिभू न्न
तं अस्य दक्षिणामाह॥ यथा यज्जनपदे यजेत तेषां यथोत्साहं दद्यात्॥ यानि या
न्यकृष्टानि द्रव्याणि यस्मिन्जनपदे स्युः यावद्व्याः तास्मिन्य [illegible] द्रव्यय उत्कृष्टद्रव्ये
जनपददेशे विश्वजिच्छिल्पेन यजेत तत्र द्रव्य वतिदं विश्वजिच्छिल्पे यागे क्रियमा
णा तेषां उत्कृष्टद्रव्याणां यथोत्साहं दद्यात्॥ यावानस्य यजमानस्योत्साहो यथो व
त्साहं दानं कुर्यात्॥ यथा [illegible] रा कौसंर्थः॥ एतदेव विवरोति॥ अजानेयानपरज
त्य ने॥ अपरजनेप्रसंगे देशे विश्वजिच्छिल्पे यागे क्रियामाणे यथोत्साहं चित्रप्रभृ
ति आजानेया कुलीनान्वीनीतात्साधुवादिनो श्वन्दद्यात्॥ आजानेयान्कुलीनाश्च
वीनीतान्साधुवाहिनः समिधाना॥ अपरदेशे हि कुलीना उत्कृष्टतमाश्वा भवंति॥

र

कासा० १२ तथा चलाद्यायनः॥ तस्य दक्षिणायानानियम्यो स्याहंदद्यात्॥ सिंजपदेयान्य मि
ध्यातत मावि स्यः॥ यंतितै रिति यानानि॥ आरोहणानि ... त्राकरणं अश्वादीनि
सा० २ यथोत्साहं दद्यात् यावानानस्योत्साहोपयोगी हतः॥ मिन्ननमदेयावंन्यमिध्यातमा
निकां क्षितमानि इषितमानि स्वति नायना भिलष... णीयानि स्फारेत्य र्थः॥ प्रा
च्येषु हस्तिनः प्राच्येषु प्राच्यां दिशि भवेषु देशेषु विश्वजित्स्ये यथा शक्ति त्रिप्र
12 भृति हस्तिनो ददाति॥ तत्र फलहस्ताह हस्तिनो भवति॥ अश्वतरीरथानुदीच्ये
षु॥ उदीच्येषु उदीच्यां दिशि भवेषु देशेषु विश्वजित्स्ये यथाशक्ति त्रिप्रभृति अ
नूर श्वतरीरथान्वेसरीयुक्तान्वे थान्दद्यात्॥ अथ सर्वेषु देशेषु वैकल्पिकं दक्षिणांतरमा
ह॥ सर्वस्वप्रतिनिधिर्वा अथवा सर्वेषु देशेषु विश्वजित्स्मे सर्वस्वप्रतिनिधिर्दक्ष
कम्भ्वा सावि सात्याकांक्षायामाह॥ धेन्वनडुत्सीरधान्यपल्यदासमिथुनमाहानसा
रोहणावि मितरायनं सि॥ धेनुर्नवं वप्रसूः॥ तागोः सवत्सा॥ अनड्वान्बलीवर्दः॥ सी
रं हलं॥ अथवा अनडुत्सीरं॥ अनडुद्भ्यां युक्तं सीरं॥ ष्छेदोगस्त त्रेष्वथगनडुद्ह हृग्न
ब णस्याभावात्॥ सीरं युक्तं हलमिति तन्मता ...ताव्या रव्यातव्या च्च॥ धान्यं व्रीहिय
वगोधूममुद्गादिकं॥ पल्याय लादिमानाहं यात्रं ... पल्योधान्यपल्यः॥ को
ष्टः॥ दासमिथुनं दासीदासौ॥ महानसापयोगितां मंचर्वादिकं सर्वं उपकारण णम १२

स्य

द्व्यं महानस---च्यते॥ अथवा महद्व्रतदन श्च महानसं वहत्या मार्गे शकटं॥ श्रौते॥
हरणं आरुह्यत इमा शेहरणं हस्म अश्वादि॥ विमितं गृहं॥ शायनं अप घापर्य कादि॥ पर्स्य सु व्य
समिखुन मितिपत्स्यः पलायन शीलः स चासौ दास अपत्स्य दास स्तयोर्मिथुनमिति
वासुदेवः॥ अत्र छंदोगसूत्रेविनियोगः॥ एतेनोक्तोपि श्व जिच्छित्स्या॥ एतेनानुक्रिपा
वि श्वाजिघ्छित्स्यत्तो व्याख्यातः द्विरात्रीणा अहीन इति पुंडिस्यः घाभ्यां रात्रिभ्यां निर्व
र्ततेद्विरात्रीणाः त्रिभिरलोभिर्निर्वर्त्यते अहीन इति॥ तथ्या॥ देक्तं प्रथममहः॥ क
उ यप्रभस्यः पवसथांतं द्वितीयं॥ सौम्यमुत्तमं॥ एवं त्र यः पक्षाः॥ स घः॥ त्रिपर्याघ
ह क्रियावा॥ अहः क्रियावेति॥ तस्य दाक्षिणात्यानि यथा साहंद्घात्त।स्मिन्ननप
देयान्यभि ध्याततमानि स्फरीति व्याख्यातमेतत्॥ सर्ववेदसनि मांद्घादिति धानं
जयोविमितः श्रायन मारोहणा महानसे दासमिथुनो धान्य पल्यं सीरं धेनुरि
ति धेनुरिति॥ सर्ववेदसस्यानि मोनिर्माणं सर्ववेदसांतमिखध्यें॥ वि मितासीरंखु
स्क क्तहलं॥ अथ पंचमं साघस्क्रमाह॥ २॥ श्येनो भिचरतः अभिचरतोभिचारं कुर्वे
तो यजमानस्य श्येनो नाम पंचमः साघस्क्रो भवति॥ अस्य विधिमाह॥ यत्रै
छ धयोनजायेरंस्तदेवयजनं यत्रो बरादवोबधयोनजायेरन्तोसघेरंतछव
वयजनं श्येनार्थकर्तव्यं॥ विदाहिवा॥ यस्मिन्नोछ धयोविदेघेरस्तघिरीहि

यत्रप्रतिवर्षंदावाग्निरोषधीर्दहति॥ तद्धोदेवयजनंरूपेणस्यावर्त्तयं। वृक्षस्तंबच्छि
न्नेवृक्षाः पलाशादयः स्तंबावीरणकाशादयः॥ वृक्षाःस्तंबाश्च छिन्नायत्र तद्वृक्षस्तं २४
बच्छिन्नं॥ तथाच छंदोगसूत्रं॥ यत्रस्तंबावावृक्षावाबहुलाजाताः स्युस्तांछित्वादेवयजनं
कुर्युरिति॥ तांछित्वा तांछित्वावाछित्वेत्यर्थः॥ वनिर्वृक्षः॥ वनिर्वृक्षमूलावृक्षास्तंबावृक्ष
र्तव्याः॥ अनिर्वृक्षमूलावा। एतेनवृक्षाणांस्तंबानांछेदनंनियमेन॥ मूलनिकृंतने
विकल्पः॥ दक्षिणाप्रवणं दक्षिणस्यांदिशिप्रवणंनिम्नंयस्यतद्दक्षिणाप्रवणं
देवयजनंरूपेणस्याद्भवति॥ अप्रवपालोपूपःस्फ्याग्यः॥ पूपोत्रचपालरहितः
स्फ्याग्यः स्फ्याग्रा स्फ्यस्यैवाग्रयस्यासौ स्फ्याग्र्यः॥ खड्गसदृशांपूपस्याग्रं
कार्यमित्यर्थः॥ तैल्वकोवा धाकोवा॥ यूपस्तैल्वकः तिल्वकमितिरामः तन्मयः स्या
त्वाधकोवा॥ बाधकोगिरिमालकः॥ रुग्मोवैभीदकः॥ विभीदकवृक्षोत्स्वयूपो
भवति दीक्षणीयादिसर्वेष्टिषु॥ शरमयंवर्हिः॥ शरमयंवर्हिः दीक्षणीयादि
षु भवति॥ अधिषवणाश्रावणभ्यो॥ शतेमत्तारीरं येनानसमाकरेनोढंभवति।
तदूत्रस्यायत्तभ्यं यत्तंकमध्यमेविपुलंफलकंततोघटिते अधिषवणफलके
व अत्रभैतः॥ शांखायनेविशेषः॥ अनुस्तरणाभगोश्चर्मा। धिषवणं॥ तथा राम
रमणानेया अपः संस्कृताः स्यादन्यग्रामेतेताभिरद्भिर्वसतीवरीरभिश्रयंतीति॥ १२

13

स्याहविर्द्धाने ॥ महीतोरथावचलविद्धाने भवतः नानसीप्राकृतप्रमाराः ॥ लोहितः
सवनीयोमयेरुद्भवते ॥ अग्नयेरुद्रवते लोहितोरक्तावर्णाः छागः सवनीयः पशुर्भ
वति ॥ लोहितवाससोलोहितोष्णीषाः प्रचरंत्यृत्विजः लोहितानिरक्तानिवासांसियेषा
नोत्तरीयाणीयेषांतेलोहितवाससः ॥ लोहितानिरक्तानि उष्णीषाणि शिरोवेष्टनवासांसियेषां
तेलोहितोष्णीषाः ॥ एवंविधा ऋत्विजोत्र स्येनेप्रचरंतिसर्वंकर्मकुर्वंति ॥ अत्राहआश्वलाय
निलो नः ॥ संनद्ध[?]लितोष्णीषानि । त्रिंशिनोयाजयेपुः शरमयंबर्हिस्मोसलाः परिधयो
वैभीदकइध्मोवाद्यातकोवावगृह्याश्रावयेत्स्रस्राश्रावयेद्वाछंद[?]ववषट्कुर्या नि
ऊ पर्यन्विवर्जुयादिति' अत्रछंदोगसूत्रेविशेषः ॥ व्रातीनानांयौधानांपुत्राननूवाना
ऋत्विजोवृणीतेस्येनस्य ॥ नानाजातीया अविसतव न यउत्सेधजीविनः संघाव्राताः
तेषांकर्मव्रातं ॥ तेनजीवंतीतिव्रातीनाः ॥ उत्सेधनशरीरायासेनजीवंतीत्युत्सेधजी
विनः ॥ यौधनां ---- वयोधभवायौधाः ॥ तेषांव्रातीनानायौधानांवपुत्रान अनुवा
नानश्रुतंपूर्णस्वाध्यायादिशिक्षायांतावप्यर्हंसमर्थानत्रश्येनेऋत्विजोवृणीते ॥ अननूवा
नग्रहणामितरेषामार्षेयतादीनांपरिसंख्यार्थं ॥ तथा अर्हतामेवतिशुक्ति[?] ८५
इतिच ॥ निवीता ॥ कंठावसक्तायज्ञोपवीताः ऋत्विजः कर्मकुर्वंति ॥ उत्क्ष्यधन्वानः ॥
उत्क्षाणिउन्नतान्यानियानिधिरूढाभेधनुंषियेषांतेउत्क्ष्यधन्वानऋ[?]त्विजः कर्म

कुर्वंति॥ कलापिनः कलायशब्देन शरपूर्णा चर्ममयी भस्त्रा उच्यते॥ कलायो विद्य
ये यांते कलापिनः शरपूर्णचर्मशरवर्षयुक्ता इत्यर्थः॥ एवंविधाः सर्वे कुलिञ्जोऽत्र कर्म *
कुर्वंति॥ अथात्र दक्षिणामाह॥ काणखोरकूटवंडकुतमिश्रा नव नव दक्षिणां दद
ति लिंगानां॥ काणा एकाक्षिहीनाः खोराः पादेन खंजाः कूटा भग्नशृंगाः॥ वंडा
श्छिन्नपुच्छाः कुतमिश्राः एतत्पूर्वोक्ताः काणादय एव ज्वरगृहीतमिश्रा भवंतीत्यर्थः॥
एवंविधाः काणाद्या लिंगानां नव नव दक्षिणां ददाति॥ लिंगानां काणादिरूपयुक्ता गावां
नवसंख्या नवसंख्या दक्षिणां ददातीत्यर्थः नव काणा नव खोरा नव कूटा नव वंडा इत्य
र्थः नव काणा नयति नव खोरान् पतीति॥ अवशालं॥ पुरुषाणां वा दानोऽधिकारात्॥
अथवा पुरुषाणां मलिंजा नवसंख्या नवधा कर्त्तव्याः॥ प्रतिपुरुषं प्रत्यलिंजे
व नव नव काणादिकान् नयति ददातीत्यर्थः॥ कुतः न॥ दानाधिकारात्॥ दानस्य प्रस्तुतत्वा
त्॥ न पतिरत्र दानार्थः॥ दानं हि प्रस्तुतं नव नव दक्षिणां ददाति लिंगानामिति॥
दानं च पुरुषेभ्य एव॥ अप्रति पुरुषं काणाद्याश्च नवविधा अपि नव नव ददातीति
प्राप्ते आह॥ प्राकृतस्य वानयनं भेदेनावाचकः पूर्वपक्षनिरासार्थः नप्रति
पु स्य नव नव किंतु प्राकृतस्यैव गवां प्रातस्यैतान्निकाणादीन् लिंगान् निभवंति॥ त
स्य च दक्षिणादानायन पनं भेदेन भवति॥ नवभिर्नवभिर्नयनं भवतीत्यर्थः

॥ एवं कृते पुरुषस्यानुकृतो भवति न च यतीसेतदपि च यथा कृतार्थं स्यात् भवति ॥ ॥
छन्दोगसूत्रविरोधः ॥ नवनवदक्षिणा इति नवर्गस्य थोसांहं दधाकाराण्खोरक एवं
डानामिति ॥ एतासां काणादीनां चान्त्रि नवर्गा न दद्यात् ॥ दक्षिणाकाले कंटकैरेनविरु
तेयु ॥ दक्षिणादानकाले कंटकैर्विल्वादिवृक्षोद्भवैरेनां ॥ काणादिका गा विरुजेयुः
विन्ध्येयुः ॥ कंटकैस्तासां शरीरं विनुधल्लोहितमुत्पादयेयुरित्यर्थः ॥ अत्र छन्दोगसूत्रं
तासामपि दक्षिणावेलायां लोहितमुत्पादयेयुरिति दीक्षणां कालेकाले दीयमानासु ना
तीनां कंटकैः पीडनया शरीरस्य लोहितमुत्पादयेयुः ॥ उपतप्तावनुपतप्तानामाज्यं ॥ ट
उपतप्तास्व्याधितासु जरितासु गोषु मध्ये या अनुपतप्ताः रोगरहिताः अजरिताः ता
सां स्यात् अपि अत्र धूपेन आसकार्यो ग्राह्यं ॥ तथाच छन्दोगसूत्रं ॥ अभिवातासु पा अ
नभिवाताः स्युस्तासामाज्यं मथयेत् ॥ अभिवातासु गोषु व्याधितासु या अनभिवाताः
स्य स्वस्थ व्याधिताः स्युस्तासां दोहयित्वा तदीयक्षीरं वक्ष्यमाणाकारेण इति शुद्ध । क्षिप्वा र
थपुधावनेन ततो यत्नव नीतमुत्पद्येत तस्यात्यं कुर्यात् ॥ अथ निप्रायुक्तानि
गमि लोहितवाससां लोहितलोयादीनि रलि वर्तानि वर्तते ॥ समाप्ते यज्ञे ताम्रे घवि क
त्रीयत्र्यानीत्साकांक्षायामाह ॥ सा घत्र अधमहिरण्यस्त्रग्वन् ॥ साधः अधर्मा लो
हितवस्त्रादयो हिरण्यस्त्रग्वनयधोपयुक्तं देयाः ॥ यथा वाजपेययज्ञोपयुक्तं

क

लिरणपस्त्रजो दीयते रावमन्नापियेनयेन न य घ द्वस्त्रादि परिरहितं तत्तसेत स्मारवोद्
बासा० वसानीयातेदयमित्यर्थः॥ अथयथंसा घक्रमाह॥ स्वविवेदक्षिणाबलिधातं
१५ षड्गात्मक त्रिकोना - - - - साघंः आत्स्याः कनुर्भवति॥ तत्र चवापिसातेच छ्छे अधि ४५।
कं गवां शतं षड्गाव स्त्र दक्षिणा भवति प स्याधिकं गवां शतमित्यर्थः इत्थंयथासा
घः आरांविशेषधर्मोज्ञाभधायेदानीं सर्वसाघंः अ(सा)धारणांविधिमाह॥ साघंः
अधर्मोः साघंः आरांधर्माः साघंः कधर्मास्ते व्याख्यास्यन्तइति प्रतिज्ञा॥ तानाह
दीक्षादि सघःसर्वं क्रियते॥ समानेन्हि साघः॥ दीक्षादि दीक्षाप्रभृति सर्वं कर्म दी
सो क्षोपसत्सुत्यारात्रावा व्यंसघः समाने ह्यवक्रियते। तत्र प्रधानकालाननुरोधात् ऊँदे
॥एकस्मिन्नेव सौत्येऽहनि देवयजनजोषणाद्यादिप्रपवे प्राक्दुवा व्यंसघः समाने
वे नांतं सर्वकर्तव्यमित्यर्थः॥ अचमानैविशेषः उपसत्सुरत्रिस्थानेसमीस्स प्रव
रंतीति। काठके॥ तिस्रः परावीरुपसदउपयंत्यपसदतरालेयुसमीस्तयंतिप्र
थमायां संस्थितायां पूपकर्मेति। आरवायनेपि॥ तिस्रपराचीरुपसदः अर्ध
इ लुप्तः षवर्ग्य इति। तथा उदिते दीक्षयेति। सलपप्सूनालभतो अत्र पप्सूत्रस
वनीयाग्नीषोमीयारुवं ध्याख्यान्न सहैव सवनीयालंभकाले अलभते॥ तत्र स्था रामः
नित्वात्सवनीयाः स्वंस्थानं न त्यजति॥ अग्नीषोमापसु स्वस्थानात्स्वस्थावित १५

स्यात्ततः पशुर्भवेदिवर इति। सवनीयकाले समानतंत्राः पशव इति शांखायनः।। मानवे।।
सवनीय। कालेयूपं संमित्य पशुं चयाकुर्वस्य सोषोमीयं सवनीयमनूवंध्यमिति नी
।। कठसूत्रेपि क्रमेणैव पशवोग्नीषोमीयाद्याः परिताः संति।। एवं सवनीयस्ततो
ग्नीषोमीयस्ततोनूवंध्य इतितंत्ररत्ने।। पुरोडाशोवाग्नीषोमीयस्थाने।। अग्नी
षोमीयस्थाने।। अग्नीषोमीयोतः पशुरित्यत्राग्नीषोमीयालस्यपशोःस्था
ने अग्नीषोमीयएवपुरोडाशोभवति।। वार्नेवति।। वपांतेसुब्रह्मण्यानिवृत्तिः वर्णा
तेतिवसतीवरिग्रहणोग्नेधानांतेकृते ईष्यरकालस्योपलक्षणं।। प्रवृत्तौतत्रैवसुब्र
ह्मण्याह्वानविधानात्।। अत्रतस्मिन्काले सुब्रह्मण्याह्वानस्यनिवृत्तिर्भवति।। वस
तिवारिनिधनांतेसुब्रह्मण्याह्वानंनभवतीत्यर्थः।। प्रतिदिशंवसत्विजः।। अत्रच
क्षमाराग्नेहोत्रादयश्चत्वारोमहर्त्विज प्रतिदिने रात्रौवसंति।। प्रतिदिशं … यथा
क्रं … सर्वासुप्राच्या … दिदिक्षु।। अतएव ऋत्विजवासविधाताधारणामर्यादा
सूर्वेद्युः कर्त्तव्या।। तात्वावृत्तानांप्रतिदिशंवासः।। एतदेवविवृणोति।। पुरस्ताद्धो
ज्ञानाद्धोता।। होतापुरस्तात्।। धिष्ण्यादिनिर्योजानदेवयजनाद्बहुः क्रोशप्रमिते
देशेनिवसति।। योजनादिपरिमाणानुलोकतएज्ञेयं।। चतुःक्रोशांतुयोजन
मित्यादिकं।। इतरे क्रोशप्रमाणपरिमाणेन क्रोशप्रमाणदेशेन।। इतरेउद्गात्रादयस्सर्वे

था ड़ा

पूर्वापेक्षया गणकेवकोणस्य प्रत्यवाये नाय चयेन परिमिते ध्वनिर्वसति ॥ होतुः कोण
चतुष्टयो वा स उत्तान्त राप क्षयात्मक कोणा पूर्व्या वायोनाग्न्यातात्रिकोणोऽधिको
णो ध्वर्युः क्रोशामात्रे ब्रह्मेति ॥ तेषामुद्गात्रादीनां दिशा आहुः ॥ उद्गातोत्तरतः ॥ उद्गाता
उत्तरस्यां दिशि कोशात्रयपरिमिते निवसति ॥ अध्वर्युः पश्चात् अध्वर्युरपरस्यां
दिशि कोशाद्वयपरिमिते ध्वनिवसति ॥ ८ ब्रह्मा दक्षिणतः ॥ ब्रह्मा दक्षिणस्यां दिशि
कोशपरिमिते ध्वनिवसति ॥ चतुर्भिरश्वरथैः सक्षीरदृतिभिरावहन्त्येनान ॥ स
क्षीरदृतिभिश्चतुर्भिरश्वरथैर्होतारं तानहोतुरुद्गात्रध्वर्यु ब्रह्माख्यान आवहति ॥ यज
मानपुरस्था अनयति ॥ स घोदुग्धेन क्षीरेण पूर्णाः सक्षीरा दृतय एवमेमस्याभ
स्ताः येषुरथेषु ते क्षीरदृतयः तैः सक्षीरदृतिभिः ॥ अश्वपुत्तरथा अश्वयाते
रश्वरथैः अश्वैरश्वरथे समश्वसंख्यामाह ॥ यथा कोशामध्वा ॥ पूर्वोक्तेषु रथे
षु रथेषु यथा कोशं कोशासंख्यानतिक्रमेण आपुनेतेन होतुः अध्वरा ॥
उद्गातुस्त्रयः अध्वर्योर्द्वौ ब्रह्मण एक इति ॥ अत्र छंदोगसूत्रे विशेषः ॥ साचः ॥
त्रीणायस्य मारोगमहतात्रे प्रातरानुतिं हुत्वा चोतर्लिङ्गः साघः कोमरति ॥ प्रा
गरावप्लिरायादिति धनंजय्य रतित थाच होतारं वहेपुरुहंदवसुद्गातारं प
संचमध्वर्युं दधिरागा ब्रह्माणं पुरस्ता... वाचवसेप्रस्तवेतेभ्यः सोमप्रब्रूपुरश्व

रथैर्यो लांत उक्ताब्राह्मणेनाध्यानश्चेति ॥ अत्र पक्षद्वयं ॥ महारात्रे ग्निहोत्रं हुत्वा
ग्रन्था २ हुत्वि साघः क्रोम रत्नारण्यान्गृह एव समक्षीर हुतीन थान्या क्लातेषु रण्येषु
यथा स्वं ॥ होत्रादीन्नुपवेश्य प्राचीं दिशं प्रति याज । नामात्रे होतारं बाहुपुरु दीचो ॥
दिशं प्रस्थाताग्रत्रिकोणे ॥ प्रसंच मध्यर्युद्धि को ब्रा दक्षिणां दिशं प्रति त्रो वर्णं त्रैव मा
मारोण एव तस्यां तस्यां दिशि गत्वा तत्काल मेव र प विवा एव पश्चादागच्छंति ।
अथवा पूर्वं दिने रथमात्विने वप्राच्यादिषु दिक्षु गत्वा होत्रा यो व से युः प्रातरग्नि
होत्र होमानंतरं सोमप्रकाः अध्वरथै स्तस्यां तस्यां दिग्गत्वा होत्रादिभ्यः सोमं
वु प्रयच्छेयुः ते अध्वरथा अध्वान श्च ब्राह्मणेनोक्ताः ॥ तथा ब्राह्मणं सर्वा दिशो
ध्वरथाः सोमप्रकाबाविधावति तीयमर्थः ॥ अध्वरथा अध्वर्युक्तां रथस
हिताः सोमप्रकौवाः सोमस्य प्रवक्तारो यजमानपुरुषाः सर्वाध्वलस्वेति
रोविधावंति वक्ष्यमाणप्रकारेणागलेयुः ॥ कस्यां दिशि कीदृशेन रथेन कि
यत्परिमाणं ध्वमवतमित्यपेक्षायां क्रामेणा सर्वमेहापा जने चतुर्वा हिंशा प्रा
च्यां दिशि आह ॥ त्रैपदे प्रष्ठिवाहिनो दिच्यां अश्ववतो घोगेग्नप्रतीव्या क्रोशेघू
रिणो तिचत्वारो चाहारयुज्यते यस्मिन्स चतुर्वाहितोदशेन रथेन प्राच्यां पोजने
क्रोशाश्चतुष्कपपरिमितदूरेण छेयुः ॥ तथा उदीच्यां दिशि लेपदेत्रियापायोजने क्रो

क्री२ द्रव्य १

कासा० १७ प्राग्यपरिमिते दूरे घोगेन अश्वयुक्तेन रथेन सोमप्रवाकं गच्छेयुः ॥ दक्षिणाद्
क्षिणस्यां दिशि अधो ध्रुवोपरिमिते दूरे स्थूरिणा एकाश्वयुक्तेन रथेन गच्छेयुः
एवं रथविशेषैः प्राच्यादिदिक्षु योजनादि दूरं गत्वा तत्र स्नानं मललिंगालो
17 मे पोषा सोमप्रवाकास्ता होत्रादीन् रथेन वेनेन येयुः ॥ अत्र छंदोगसूत्रं ॥
र्त्वे कुर्युरेव ... जइति श्रुतिः स्थास्यामि तु ब्राह्मणाः स्नानं न ध्वनकुह्वात तैते भ्यां सोमप्रवपुरसो
सघः क्रियासु अनेनत दहं प्रब्रुवीमीं क्षुपविश्व भ्योदेवेभ्यो ब्राह्मणेभ्यः ॥ साम्येभ्यां सोम
पेभ्य इति ॥ अत्र यहो वाक्षीन्यति सोमप्रवचनेमचः ॥ ता तानवनीतमाज्यं ॥ ततस्तेभ्यो
प्रवभ्यः सक्षीरहृतिभ्योरथे भ्योपन्नवनीतमुत्सघेत हतिषु वद त्रैजे आज्यं भवति ॥
यदाज्यकार्यं तत्तेनकर्तव्यमित्यर्थः ॥ अत्र छंदोगसूत्रविशेषः । सक्षीरदृतयो
रथा भवंतीति सद्यो दुग्धेन क्षीरेणावृतयः पूर्णाः स्युः तत्र ... तान्नवनीतमुद्दीपालके ५८
नोवातदाज्येपि सज्जेयुः अन्यस्मिन्नृतेनि पत्नयो युरित्यर्थः ॥ अतोस्मिन्यत इति न५
भ्य उत्पन्नं नवनीतं मिश्रणीयं ॥ सोमक्रयणास्त्रिवत्सः सांडः त्रिवत्सास्त्रिवर्षः
सांडसंयुक्त ऋषभः समुष्कः । सोमक्रयणो भवति न छिन्नांडः ॥ अत्राभिमंत्रणा
मंत्रे ऊहः कार्यः ॥ विदसि मनोसि धीरसि दक्षिणोसि क्षत्रियोसि यज्ञियोस्य
दितिरस्यभयतः शीर्ष्णो सतः सुप्राजुप्रत्यजे धीति ॥ अत्र छंदोगसूत्रं ॥ त्रि राम १७

वत्सस्य ३ इति बर्कुस्त्रिवर्षस्य नामपदि त्रिवत्सः इति योवा तिस्रो धयेत् त्रिवत्सो वै वत्स्यादिति ॥ इ
यदसमाप्तत्रिवर्षो बर्कुस्त्रिवर्षः तस्य बर्कुस्त्रिवर्षस्य ॥ जानपदी जनपदेनैवो जानपदी सत्रिव
त्स इति ॥ सो व्यति स्रो गाः उधयेत् पिबेत् इति सगा वत्स त्रिवत्स इति ॥ अथवा वत्सर पदस्यात्र
वर्णलोपश्छन्दसः तेन संपूर्णत्रिवर्षः [illegible] त्रिवत्सः ॥ वेदिके उर्वरा अत्र साधयेदुर्वरा सस्या क्षे
व्या भूमिर्वेदिर्भवति ॥ उर्वरा सस्याधरक्षेत्रके न सस्यान्याधरक्षेपेक्षा या माह ॥ व्रीहीन्य
कन्वाय घामध्यवस्य विव्रीहीन यन्वाय घानूबे दिचे न्याध्यवस्यति ॥ व्रीहि सस्यन्नयवस
स्यान वा आधा संयुक्ता भूमिर्वेदिर्जती लथ्यं ॥ अत्र यत्र सूराम सत्रं ॥ उर्वरा यादिरिति पूर्वम
यव्रूर्वराय धाक्ष्याधो क्षवे रावा ॥ व्रीहियवयोर्मध्ये अन्यतरेण सस्येन परिप --- ध्याप्युक्ता
भूमि वेदिर्भवतीत्यर्थः ॥ खलउत्तरावेदिः ॥ अत्र साधं केखलउत्तरवेदिर्भवति ॥ अत्र
संदेहः किमयं धान्यखलः पांसुखलो वेति ॥ तत्र सूत्रे गौवपक्षं प्रगीकरोति ॥ धान्यख
लः प्रसयात् ॥ धान्यखलो धान्यराशिरेवात्र खलः प्रसेतव्यः ॥ कुतः प्रसयात् ॥ खलइत्यु
क्ते धान्यखलएव प्रतीयते ज्ञायलयतः ॥ स धान्यखलः कथं निष्पादनीय इत्यपेक्षा
यमाह ॥ यवेदिमभितस्स्यानुत्तरवेदिदेशो महति ॥ यस्मिन्क्षेत्रे व्रीहयो यवा वा पक्का
भवन्ति ॥ तत्र वेदिः कर्तव्येति प्रागुक्तं ॥ तत्कृताय ॥ वदो वेदिमभितः परितो वर्तमाना
ये व्रीहयो यवा वा तान्व्रीहीन्यवान्वा तत आनीय उत्तरवेदिदेशे उत्तरवेदिस्थाने व

कासा०
१८

दिपूर्वार्द्धमर्द्धतिमर्दयंतिस्तंबेभ्योविमोकार्थमनडुह्विमपरितोगच्छन्दिराजमयंतीत्यर्थः। अत
श्चवेदेःपरितोभवन्ब्रीहीन्पवाच्छिन्नोत्तवेदिदेशो आनीयानडुह्दिमर्द्द२ पित्वास्तंबेभ्योविविच्य
राशीकृत्वाधान्यखलउत्तरवेदिः कार्य इत्यर्थः॥ द्वितीयंपक्षमाह॥ पांसुखलोवाप्रत्यया
विरोधात्प्रकृत्यनुग्रहाद्ध्रुवावाराद्वः पक्षांतरावधारणार्थः॥ खलउत्तरवेदिर्भवतीत्यत्रपां
सुखलोधूलिराशिरेवप्रत्येतव्यः कुतः प्रत्ययाविरोधात्॥ खलइत्युक्ते धान्यखलोपिप्रती
यतेपांसुखलोपि॥ किंचप्रकृत्यनुग्रहाच्च॥ प्रकृतावप्योतिष्टोमेपिपांसुखलएवोत्तरवेदिर्दृ
नदृष्टः॥ अतोत्रापिपांसुखलेंगीकृतेप्रकृतिवत्करणात्प्रकृतिरनुग्रहकृताभवति॥ अतः
पांसुरेवोत्तरवेदिवार्यइतिसिद्धंतः॥ अत्रछंदोगसूत्रेविरोधः उर्वरावैरेतिप्रथमेया
वावरापद्धास्याद्वितीयवरएवातत्तएवसमुत्कृत्तखलउत्तरवेदिंकुर्युः॥ अतीतायांवेछचिचला
यांव्रीहिवेलायांवायजेतधान्यपात्रानुपाभिर्क्षेप्यधान्यपात्रउत्तरवेदिर्मतस्यबाल
भागः। मानवसूत्रेचवालदेशोलांगलेयांखलेवालीनिहयवाक्विष्नंति तेयामुत्तरवे
दिंधिष्ण्यापाश्चनीयवंतीति॥ खलेवालीयपयः॥ खलमध्येनिखातामेथीखलेवालीमेव
यूपोभवति॥ खलेवालीशब्दस्यापतिसिद्धाख्यात्स्वयमेवव्याचष्टे॥ लांगलेयाः॥
लांगलेयाः॥ लांगलस्यहलस्येषाहलसंबंधीइषाईडापयः कार्यइत्यर्थः॥ साचहल
स्येषाखलमध्येविन्यातासतीअन्यत्रगच्छतोनडुहोवारयतीतिखलेवालीत्युच्यते॥ राम
१८

18

खलेवालीयूपोभवत्येतयाहितं दे सुमुह्यत्तुसंनीनितां प्रेप्सुतत्वात्॥ इयंचयूर्वखलमध्ये
निखातोचयूपस्यकार्येभवतितांपूर्वंनिखतामेवयूपस्थानेविचिंत्यतदनुरोधेनवेदिशाला
दिसाधनीयं।परिधौपश्चुंनियुंजंतीत्यत्रपरिधिशाकलेनस्वरूपमेंमुखलेवाद राषितध्वख
लेवालीशाकलेनस्वरूपकर्मकार्यं॥ कलापिवयालाथै॥ कलापीधान्यतृणामुष्टिस्तबालाा
र्थ्यंभवति॥सपलयवतृणमूलकोव्रीहितृणपूलकावाअत्रकलापिस्ति॥ निर्वृत्तेग्रहणा
ख्यातनिवृत्तिः निर्वृत्तायानिष्पन्नायाः लौकसिद्धायाः पूर्वमेवखलमध्येनिखातायाः
खलेवाल्याः॥ ग्रहणातयूपकार्येविधानताक्रतस्यपूपाहुतिप्रश्नार्थेधर्मजात
स्पनिवृत्तिर्भवति॥ एवंच पर्य्यग्रणप्रोक्षणाजनादेरपिनिवृत्तौप्राप्तायामाह॥ अा
वेशादनिवृत्तिः पर्य्यग्रणप्रोक्षणादेरनिवृत्तिर्निवृत्तिर्भवति॥ कुतः आवेशात्॥तेहि
खलेवाल्यामयावेशूपतेनिवेश्यते॥विधीयंते॥ खलेवास्तीयूपोभवतीत्यनेन॥कथं॥
पूयशब्दोर्थवनीयादिराद्धवसंस्कारनिमित्तः॥ तेनखलेवाल्यापयन्सदःप्रयु
ज्यमानस्तद्धर्मोत्प्रायपति॥ तत्रेच्छेदनंनिखननंचार्थाल्लुप्तं॥ पर्यग्रेणातुदार्थार्थ
त्वापूर्वनिखातायामपिकर्त्तव्यंक्तला‌द्भवत्येवं॥एवंप्रोक्षणाजनाद्यपिज्ञेयं॥श्रोत्रा
वनयेनाभावः तत्राचमन विवक्षु खलेवालीप्रोक्षणप्रभृति पूपंकुर्वंतीति॥ उर्वरा
दिवाद्वियस्यसंनिधेः॥ वेदिरुर्वराउत्पाद्दिक मजातंद्वितीयस्यसाधात्रास्पभवती

कात्या०
१२

वे

नाम्ने यां। कुतः संनिधेः तां प्रेहि द्वितीयस्य साद्यः कसंनिधावे वेदिरु वीरस्यादौ मां पावास्य
वासर्वे यां साद्यः कारणां वेदिरु वीरस्याधर्मजातं भवति। साद्यः क्रानुपक्रम्य विधन्नात
यस्य नेः संनिधेर्द्वितीयस्यैव सुत्यं।। तत्रोच्यते। पंच्यमानं घनश्रुपमेव वा स्य विसंनि
हिततरं भवति तेन संनिधानमकारणां द्वितीयं मखे।। अप्रांतं सर्वे साद्यः क्रारणमु
वेरा वेदिविध्यादि धर्मजातं भवति। तथा च छंदोगसूत्रं उर्वरादेरिति प्रथम इति।
कात्यायनोपि।। प्रथमस्य कात्यस्तोम साद्यः क्रे सुवचनादिति। मानानविरोधः।। महारा
त्रे क्षीर इतीनश्वरयेव ध्यास ये द्याधायरु लिजः समाने पंपुरस्तादूनुः क्रोशाध्वर्युपु
जा होतार मुत्तरत स्त्रिक्रो भूरा त्रिलजो हुता रंप श्चाद्धि क्रोश्यादियुजार्यु दक्षिणतः क्रो
शूरा स्थूरिणा ब्रह्मा णादतिन वामीत माय्यमुर्वरा वेदि रुदिते दीक्षयंति स द्यः स
र्वं कुर्वंति सा ऽस्त्रिवत्सः सोमक्रयणा उपसन्नु रात्रि स्थाने संमीत्यप्रचरंति प्रा वालद
शे लांगले यारवलेवालीनिहन्यय वा। किमर्थं ति तेषां मुत्तरवेदिं धिष्ण्यांश्च निवपंति
विवद्यस्खलेवालीप्रोक्षणाप्रभृतिपूर्वं कुर्वंति यवकलापो चु पालम ग्नीषोमीकाले व
मी श्रीठौ यं णायुरा ऽश्येनप्रचर्यवरीजे न्काति सवनीयकाले यूपं संमित्सपश्नु
पाकरोत्य ग्नेबामीयं सवनीयमनवं ध्ये दक्षिणाकां श्च श्वेतरु क्षपतिमां गिरसा
यो हात्रे द द्यादनूवंध्या काले मैत्रावरुणा एककपालः पयस्यावा संवत्सरताजीतना राम
१२

19

भ्यां जीतनोपरिष्टात्सादो प्रक्षालतीति। अथ स्थूरिणा एकाश्वयुक्तेरथेनेत्यर्थः। कठस्
त्रे। महारात्रे वाग्यतस्याग्निहोत्रं हुत्वा योजनमात्रेभ्य ऋत्विजः समावहंतिपुरस्ताद ध्व
र्यं दक्षिणातो ब्रह्माणं पश्चाद्धोतारमुत्तरतं उद्गातारम ध्वर्युरथेः साक्षीर इति भिस्तरोपनू
वनीतमुदीयालदाभ्येकुर्यात्दृढटथ धंतमादित्यमुतिष्ठेत आदित्येभ्यः सघः सुत्यां प्र
वीमि मित्रावरुणाभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यः
सोम्येभ्यः सोमपेभ्यो ब्राह्मणपयदीक्षतमितिष धूराणाद्दीक्षलशालायामग्नी
न्विहृत्य परःकंवनिधायसत्तहोत्रा हुत्वा तु समावाचोयमग्नादाग्पतस्य सनिप्र
हिरोगाबूमि प्रापणीयं चरुं निर्वपंतितुत्सनीप सदस्यसंतहविषतावाच्यंविमूजते कृ
धेन्वराज्ञानं क्रीणीत्य ज्ञाहि एणंवाधिकंददाति त्रिहायनानमांडेने लकेति स्त्रः पेरा
चीरुपसदउपसापसदंतराले षु संमीलयंतिप्रथमायां सं।स्थितायां यूपकर्ममम
ध्यमायां सं।स्थितायां तु स्योनसोवेदिकार्यापवोर्द्धरायां वेदिमिमायमध्यं उत्तरवेघां
सं यूपं निहत्स्यनहि चीवध्वांते लामनु होवध्वा प्रदक्षिणां पर्यणायंति मदिले षु प्रव
घ सूयंयपवेगर्तसंपूर्यकुर्यायांव्रतरवोघांकलांखले चायां कर्त कलापि च वालंपू
पंकुर्वंतीत्येक उत्तमायां सं।स्थितायामपि प्रणायनादि तु स्य मास्वरूपोक्षणात्सर रणा
त्सर रणकाले प्राचोयवत्स्य श्रयाति यत्राबर्हिर्भवति दर्भैः प्रख्यांस्तरणाति स्वर्वतं क्रला

कात्या० २०

कुंभाद्वसतीवरीर्गृहीत्वा सांद्रपि त्वाग्रणावद्भ्यास्त्रणानुच्छायं वसतीवरीः परीहरंतीधाव

र्गेः संनहनुत्समाग्निन स्यग्रहणाद्दाक्षिणं गच्छीत्वा सदप सृप्तु न्यावकरोत्यग्नीषोमीयं वसवनी

यमेवावस्त्रणीवद्भ्रामनूवं ध्यामग्नीषोमीयस्य स्थाने ग्नीषोमीयपुरोडाशानिर्वपेदन्

वं ध्यायाः स्थानेमैत्रावरुणपामिक्षयायातदक्षिणावेलायामध्वंयवं रुयं वढं ब्रह्मणो

दद्यात्त्वांगिरसावृक्ष्मानीयमानमायाः सयोः सामाभिरुपतिष्ठते हा — र्द्ध — सर्वेभ्यस्तुल्य

मनुवंध्यायाः मूलकर्मानस्तमितेवभ्यंतिती॥ पराचीरनाहृत्ता इत्यः॥ यजमान

गृहकुंभाद्ध स्तीवरिग्रहणं॥ इजानकुलाद्वसतीवर्यं इति श्रुतं स्वापनाई जानस्यप

जमानस्यैवेतितन्मुख्ये॥ उक्ताः साधः काः॥ अथव्रात्यस्तोमाह॥ ३ ॥ व्रात्यस्तो

माश्चत्वारः व्रात्यस्तोमसंज्ञाश्चत्वारः क्रतवोभवंतीत्यर्थः तेच गणायज्ञाः॥ अवच

३ नेग्निष्टोमदृष्टवल्कसाद्ग्निष्टोमसंस्थाः॥ तेषां व्रात्यस्तोमानांमध्येद्वितीयस्यासंस्था

विशेषमाह॥ द्वितीयउक्थ्यः॥ चतुर्णांमध्येद्वितीयोव्रात्यस्तोमउक्थ्यसंस्थोभवति रुध्य

अन्येत्रयोग्निष्टोमसंस्थाः॥ व्रात्यानांस्तोमाः॥ षोडशवर्षा अप्यनुनीता अयाः पु

रुषायेषांतेसावित्र्यापिविना व्रात्याइत्युच्यंते॥ अन्येपिद्विजातिकर्मपरित्यज्यहो

नकर्माचरणाश्चैलास्तेतथाविधा व्रात्याएवकथ्यंते॥ तेच व्रात्यस्तोमपठिताः हीनावा राम

णातहियंतेये व्रात्याएवसंतिनहि ब्रह्मचर्यं चरंतिन कृषिनवाणिज्यामिति॥ तथागर २०

व

20

गिरोवाऽएते येव्रात्या घं जन्म मन्त्रसद इति अदुरुक्तवाक्यं दुरुक्तमाहुरदंडं दंडेन घ्नंतश्च
रंस्यदीक्षिता दीक्षितवाचं वदंतीति एवंप्रकाराः सार्वेपि व्रात्यास्ये चान्येश्वशास्त्रांतरेषूक्ता
स्तेपि व्रात्याः तेषां व्रात्यतायनयनार्थोऽयं मेयज्ञः ॥ ते च लौकिके ग्नौ भवंतीति कर्कस्वाम्य
पा ४ यकारौ ॥ तन्नोपपद्यते आर्यावर्तरविरोधात् ॥ तथा च छंदोगानां सूत्रं व्रात्यस्तोमे यक्ष्य
माणाः पश्चिमाग्नौ नाधानोपयज्ञोपकारणानि चेपूर्वएते वा मध्यमेऽभिक्रांतनमः
स्यादभिजनेन वा तद्भावेपि भोगलाभेन तस्य गार्हपते दीक्षेरन् क्षीणश्चानुक्षयेपुरि
तिमानेवेपि ॥ अग्नौ न्यध्वर्युगृहपतेरग्निषु संन्यस्य पयजेरन्निति ॥ कठसूत्रे ॥ [illegible] पं ७
चरिष्यते ॥ व्रात्यस्तोमे ग्नौ नु समो यमुख्यर्थाः सहयजेरन्निति अतः सर्वे व्रात्या व्रा
त्यस्तोमार्थमेवाधानं नाप्य यागाग्नौ नुस्नायाधानोपादेते येव गृहपतेरग्निषु र
पं ६ तेरतः स्वानामेव चर्याणां चयारणाप्राग्नौ नां संनि पावकलाप्रास्तोमान्कुर्युः वचनाद
नधीतवेदानाम भार्याणां च व्रात्यस्तोमार्थे आधाने धिकारः तथा चाल्पयकारि
काकारः अभार्यस्यानधीतस्य स्यादाधानं तदर्थतः इति ॥ व्रात्याश्चतुर्विधा भवंति ।
निंदिताः कनिष्ठाः ॥ ज्येष्ठाः ॥ एतत्त्रितयव्यतिरिक्ताः हीनाचाराश्चेति । तत्र प्रथमे
हीनाचारणां निंदितप्रभृतीनां च पाराणां द्वितीयं प्रभृतयो यज्ञाः ॥ एतत्त्रितयव्यति
रिक्तानां व्रात्यस्तोमे धिकारमाह ॥ व्रात्यगणस्य ये संपादयेयुस्ते प्रथमेन

कात्सा० २१ य[?]रन्॥ ये व्रात्यान् संगीतवाद्यशास्त्रधारणादौ स्वयं प्रवीणाः संतः उपदेष्टारो भू-
त्वा स्वाविर्घां व्रात्यगणस्य व्रात्यसमूहस्य संपादयेयुः शिक्षयेयुः शिक्षयेयुः पाठयेयुः
तत्प्रथमेन व्रात्यस्तोमेन यजेरन्॥ अथ तांड्यं श्रूयते॥ हीना वा एते हीयन्ते ये व्रात्यां प्रवसं- यं २
ति न हि ब्रह्मचर्यं चरंति न कृषिं न वणिज्यां षोडशो वा एतत् स्तोमः समाप्तुमर्हती-
ति ये पुरुषाः व्रात्यां व्रात्यतां विहितकरणामासिद्धिनिषेवस्य रूपं प्राप्य वसंति एते
हीनाः निकृष्टा एव संतो हीयंते अतिकृष्टतमा भवंति तत्र कस्य हेतोः न खल्वेते ब्रह्मचर्य- ल ६
व्रात्यरोचितं कर्माचरंति ततो हीनाः संपन्नाः यस्मात्कृषिवाणिज्यावाणिज्यः क्रियां क-
शविक्रयादिरूपां वर्तनं कुर्वंति ततो वैश्यव्रातेरपि हीनाः तस्मादेते निकृष्टतमा भवंती-
त्यर्थः एष षोडशस्तोमः तथाविधानेतान् व्रात्यान् समाप्तुमर्हति श्रेष्ठं प्रापयितुं योग्यो
भवति॥ तथा गरगिरो वा एते ये ब्रह्माद्यं जन्यमन्नमदंत्यदुरुक्तवाक्यं दुरुक्तमाहुरदंडं दंडेन
घ्नंतश्चरंत्यदीक्षिता दीक्षितवाचं वदंति षोडशो वा एतेषां स्तोमः पाप्मानं निर्हंतुमर्ह-
ती यदेते चत्वारः षोडशा भवंति तेन पाप्मनो ऽधि निर्मुच्यंत इति॥ एतेव क्ष्यमाणा गरगी-
रो वै गरस्य विषस्य भक्षयितारः॥ ये व्रात्या ब्रह्माद्यं ब्राह्मणा भोज्यं जन्यं जनपदसंबंधि
अन्नमदंति। व्रात्यगणार्थे परिकल्पि--- भंवलात्कारेणाभुंजत इत्यर्थः यच्चादु[?]रुक्तं राम
वा संश्रोभनार्थप्रतिपादकं वाक्यं दुरुक्तं दुष्टमाहुः॥ तथा अदंडं दंडा[?]र्नहजनं दंडेन २१

घ्नंतो हि संतश्चरंतितथास्मृयमदीक्षा अ कृ दीक्षाः दीक्षिताः प्रयोज्यांवा चंवदंति॥ एवंयेयवहुविध्य
न्विपरीताचारानाचरंतिएतेविप्रभक्षकाः नरकाहतोर्भ यसः आयसं चयस्मन्निष्पवमानत्वादि
सर्थः॥ तस्मादेशांव्रात्यानांपाप्मानंपापं निर्हंतुमिदं८ ग्घुं षोडशस्तोमराबाहति॥ तथाचयदे
तेचत्वारः षोडशाः षोडशाःस्तोमाभवंति अच्छावाकस्याप्रयपच्वयो माध्यंदिनाभवन्त्ये पव ४४
वमानयोः तेन षोडशास्तोमचतुष्टयेनपाप्मनः सकाशात्दृष्टापरिनिर्मुच्यंते॥ प्रक्षीणपा
पाः मुक्ताभवंतीत्यर्थः॥ अथद्वितीयस्यव्रात्यस्तोमस्याधिकारित्वमाह॥ द्वितीयेननिंदिता
नश्रोर्‍ठः स्यायेव्रात्यानृशंसानिंदिताः नाभिर्मनुष्यैरभिशंसनेनपापाध्यारोपणेननिंदि
तागर्हिताःज्ञातिभिर्बहिःकृताः तेयंतस्मापनिवस्यथेद्वितीयेनव्रात्यस्तोमेनो संस्थे ७८
नयजेरन्॥ अथेषषट्षोडशीयेनशंसानिंदिताः संतोतन्व्रात्यांप्रवसंतियस्माघ्यांडश
निस्तोत्राणिभवंतितेनपाप्मनोविनिर्मुच्यंतइतितां अप्रवणात्॥ अचिपूर्वेणक्रमेण
रत्यतेपाप्मनापापेनगृहीताः येनशंसानिंदिताः अभिशंसनेनगर्हिताः संतोव्रात्यं
प्रसवति॥ पाप्मनोधिपायान्निर्मुच्यंतइतिशब्दार्थः॥ अथतृतीयस्यव्रात्यस्तोमस्या
